Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीहेमचन्द्राचार्यग्रन्थावली नं० १२

अर्हम्

श्वेताम्बरपण्डितश्रीलक्ष्मीधररचितः

# श्रीतिलकमञ्जरीकथासारः

श्रीमत्पन्यासश्रीनीतिविजयोपदिष्ट 'चाणस्मा' वास्तव्य 'शा. गणेश सांकलचन्द,' इत्येतस्य द्रव्यसहाय्येन
पत्तनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी 'शा. लहेरुचन्द भोगिलाल' इत्यनेन प्रकाशितः

श्रावकपण्डितवीरचन्द्र-प्रभुदासाभ्यां च संशोधितः

अहम्मदाबादे 'पांचकुवा' प्रत्यासन्न 'सत्यविजय' मुद्रणयन्त्राधिपतिना 'शा. साकलचन्द हरिलालेन मुद्रितः

संवत् १९७५. वीर संवत् २४४५. सन १९१९.

मूल्यम् रु. ०-८-०.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## श्री हेमचन्द्राचार्य ग्रन्थावली. मु. पाटण (उ. गुजरात.)

**प्रसिद्धिं प्राप्ताः**

| | |
|---|---|
| १ दोधकवृत्तिः | ०—३—० |
| २ न्यायावतारः [ वृत्तिटिप्पनसहितः ] | ०—८—० |
| ३ सिद्धदूतकाव्यम् ( योग विषयकम् ) | ०—२—० |
| ४ वसुदेवहिण्डीसारः ( पत्राकारे ) | ०—२—० |
| ५ वेदाङ्कुशः ( ,, ) | ०—६—० |
| ६ नयस्तववृत्तिः | ०—३—० |
| ७ काव्यमनोहरम् | ०—१२—० |
| ८, ९, १०, ११ मण्डन ग्रन्थ संग्रहः भा० १ | |
| १२ तिलकमञ्जरीकथासारः [ पत्राकारे ] | ०—८—० |

**मुद्रायन्त्रे.**

१ बृहद् महार्णवन्यासः
२ धर्मपरीक्षा.
३ चतुर्विंशतिप्रबन्धः
४ अनेकान्तवादप्रवेशः
५ काव्यमण्डनम्
६ जीवाऽनुशासनम्
७ प्राकृतव्याकरणम्
८ तिलकमञ्जरीकथासारांश ( ગુજરાતીમાં )
९ प्रथम कर्मग्रन्थ ( વિવેચન સહિત )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

अर्हम्

श्वेताम्बरश्रावकपण्डितश्रीलक्ष्मीधरराचितः

# श्रीतिलकमञ्जरीकथासारः ॥

वन्दारुवासवोत्तंसस्रंसिमन्दारदामभिः । त्रिसन्ध्यरचिताभ्यर्चां वीरपादद्वयीं नुमः ॥ १ ॥
सद्वर्णा विबुधस्तुत्या सालङ्कारा लसत्पदा । द्वेधाऽपि जायतां देवी प्रसन्ना मे सरस्वती ॥ २ ॥
न स्तुमः सज्जनं, नैव निन्दामो दुर्जनं जनम्; । नैवमेव स्वरूपं तौ सुधाक्ष्वेडाविवोज्झतः ॥ ३ ॥
इदं तिलकमञ्जर्याः कथासङ्ग्रहकारण[क]म् । क्रियते सारमस्माभिरल्पाल्पन्यस्तवर्णनम् ॥ ४ ॥
अस्मिन् दृब्धास्त एवार्थास्त एव ननु वाचकाः । गुम्फविज्ञानमात्रेण मम तुष्यन्तु सज्जनाः ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अस्त्ययोध्यापुरीशुभ्रसौधपद्धतिभियया । सौन्दर्यनिर्जिता नित्यं माहेन्द्रीपूर्विहस्यते. ॥ ६ ॥
तस्यामग्विधूवक्त्रचन्द्राकालघनोदयः । मेघवाहननामाभूदेकच्छत्रमहीपतिः. ॥ ७ ॥
लावण्यसुधया सृष्टभवप्लुष्टमनोभवा । बभूव भूपतेस्तस्य प्रेयसी मदिरावती. ॥ ८ ॥
सम्पन्नेऽपि यथाकामं विषयग्रामजे सुखे, । न तयोः सन्ततिर्जज्ञे; दूनमेतावता मनः. ॥ ९ ॥
आरूढौ भद्रशालाख्यमथ प्रासादमेकदा, । अपाच्या मुनिमायान्तं वियता तावपश्यताम्, ॥ १० ॥
उपवीतजटाजूटवल्कलाषाढधारिणम् । द्योतयन्तं दिवं दीप्त्या विद्याधरकुलोद्भवम्. ॥ ११ ॥
प्रत्युद्गम्य कृतार्घेण राज्ञा दत्ते स्वविष्टरे । निविष्टो मदिरावत्याप्य नीते. रचिताञ्जलौ ॥ १२ ॥
राजन्यथ सुखासीने सर्वस्वमपि यच्छति, । निःस्पृहस्तं निराकृत्य मुनिर्वक्ति स्म भूपतिम्—॥ १३ ॥
" रमणीया पुरी केयं ? को वा पुण्याकृतिर्भवान् ? । किं ते गोत्रमियं का वा ? म्लानिर्वा भवतः कथम् ? ॥१४॥
अस्याः कपोलपाली च किमित्यश्रुजलाविला । हिमक्लिष्टतमीकान्तमण्डलाकृतिमश्नुते ? ॥ १५ ॥
बाष्पोष्मधूसरच्छायो दधात्यस्याः कुतोऽधरः । वह्निज्वालादरश्लिष्टलवलीपल्लवश्रियम् ? ॥ १६ ॥
पुत्रिकेव स्थिता हैमी महीपतिमहानसे । कथं वानुकलं धूमध्यामतामवलम्बते ? " ॥ १७ ॥
दशनांशुपयःपूरैर्वदनस्थां सरस्वतीम् । स्नपयन्नथ भूपालः प्रत्युवाच तपोधनम्—॥ १८ ॥
" पुर्ययोध्याभिधा मूर्द्धचूडारत्नमियं भुवः, । कियद्भारतभोक्ताहमैक्ष्वाको मेघवाहनः, ॥ १९ ॥
प्रेमपात्रं ममेयं च कलत्रं मदिरावती. । कायविच्छायताहेतुरेकैव निरपत्यता. ॥ २० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एषैव कुरुते गाढमस्या अपि तनुं तनुम्. । हेतुर्विशेषतस्त्वेष लोचनाम्बुविमोचने,–॥ २१ ॥
प्रातरद्य मयाश्रावि बन्दिनेदमुदीरितम्,–। "तवोदेत्युदयायार्को नृपाराधय देवताम्." ॥ २२ ॥
[ विपदिव विरता विभावरी, नृप ! निरपायमुपास्व देवताः । उदयति भुवनोदयाय ते कुलमिव मण्डलमुष्णदीधितेः.]
( अपरवक्त्रं छन्दः )
देवताराधनार्थं च वने चेतः कृतं मया, । इयमाह–'मयापीदं कृत्य, मित्यूढनिश्चया ॥ २३ ॥
मां निषेधपरं बुध्वा धौताञ्जनमलीमसम् । घनमेषा सृजत्यश्रु; तदिमामनुशासय. " ॥ २४ ॥
ततः समाधिमाधाय पुनराख्यन्मुनिर्नृपम्–। "अलं खेदकरैः क्लेशैर्वनवासकृतैस्तव, ॥ २५ ॥
निजमन्दिर एव त्वं भूपालकुलदेवताम् । नियम्य करणग्रामं राजलक्ष्मीं प्रसादय. ॥ २६ ॥
गृहाणेमां च सर्वार्थसम्पादनपटीयसीम् । वन्द्यां विद्याधरेन्द्राणां त्वं विद्यामपराजिताम्, ॥ २७ ॥
इयं चिन्तामाणिप्रख्या प्रभावातिशयान्विता । जपनीया त्वया भक्त्या त्रिः कृत्वा देवतार्चनम्." ॥ २८ ॥
सम्यगालोक्य पार्श्वाणि, कृत्वा रक्षां नृपात्मनोः, । विद्यावर्णावलीं कर्णे नीचैरयं वितीर्णवान्. ॥ २९ ॥
" अनुजानीहि, गन्तास्मि जम्बूद्वीपत्रिवर्त्तिषु । तीर्थेषु, पुष्करद्वीपादिहायातं मयाऽधुना." ॥ ३० ॥
इत्युक्त्वा जपता विद्यां नभःसञ्चारकारिणीं । उत्पेते सहसा तेन विहायो [१]गवलप्रभम्. ॥ ३१ ॥
मणिस्तम्भप्रभाजालैरासूत्रितसुरायुधम् । राज्ञाऽपि कारितं तुङ्गमुद्याने देवतागृहम्. ॥ ३२ ॥

१ महिष.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुक्ता शैलमयी मूर्तिर्मणिश्रेणीविभूषिता । क्षीरोददुहितुर्देव्यास्तदन्तश्च प्रतिष्ठिता. ॥ ३३ ॥
कृतत्रिःसवनो धौते वसानः सितवाससी । देव्यास्त्रिसन्ध्यमभ्यर्चां चक्रे, विद्यां जजाप च. ॥ ३४ ॥

कृतायां पूर्वसेवायामेकदाऽथ महीपतिः । निरयाय पुरः सायं तरवारिलतासखः. ॥ ३५ ॥
बाह्यारामशिरोरत्नमादितीर्थतया श्रुतम् । अगाच्छक्रावताराख्यं सिद्धायतनमुत्तमम्. ॥ ३६ ॥

अथ शक्रेण साकेतपुरारम्भे निवेशितम् । श्रीयुगादिप्रभुं नत्वा, सम्मुखीनमुपस्थितम्, ॥ ३७ ॥
प्रविशन्नेव तद्द्वारेऽपश्यद्वैमानिकं सुरम् । दिव्यालङ्कारसम्भार–भासुरीकृतदिङ्मुखम्, ॥ ३८ ॥
म्लानदामादिभिश्चिन्हैः सूचितच्यवनक्षणम्, । अभ्यासगे विनाशेऽपि स्फारस्फुरिततेजसम्. ॥३९॥ (त्रिभिर्विशेषकम्)
'दिव्योऽयमिति' मन्वानो मुक्तकौक्षेयकस्ततः । चक्रे मधुरया वाचा स्वागतं विहिताञ्जलिः. ॥ ४० ॥
देवोऽप्युवाच भूपालं " लक्षणैश्चक्रवर्त्तिनाम् । मध्यमो लोकपालस्त्वमपृष्टोप्यवसीयसे. ॥ ४१ ॥
पुरा हरेः पुरोऽश्रावि वर्ण्यमानः सुरैर्भवान् । यथा–"सर्वगुणो राजा भारते मेघवाहनः. " ॥ ४२ ॥
ज्वलनप्रभनामानं सुरं सौधर्मवासिनम् । विद्धि मामादितीर्थेशसेवायै समुपागतम्. ॥ ४३ ॥
नन्दीश्वराभिधं द्वीपमितो गन्ताऽस्मि, तत्र मे । परं मित्रं सुमालीति प्रेमपात्रं हरेः सुरः. ॥ ४४ ॥
स्वयंप्रभाख्यया देव्या जिनायतनसन्ततेः । श्रियं द्रष्टुं समानीतो रमते तत्र सम्प्रति. ॥ ४५ ॥
पुरी रतिविशालेति तस्य तत्रास्ति, साद्य मे । सहायैर्गलितच्छाया दृष्टा; तत्सन्निधावपि ॥ ४६ ॥
अप्रवृत्तोत्सवं दूरम्लानवक्त्रपरिच्छदम् । शुष्कचन्दनमालौघं तन्मन्दिरमपीक्षितम्. ॥ ४७ ॥



For Private and Personal Use Only

अभावो नचिराद्भावी नूनं तस्य, नहीदृशाम् । प्रकृतीनां विपर्यासा जायन्ते स्वर्गिणोऽन्यथा. ॥ ४८ ॥
भाविदिव्यर्द्धिविरहक्लिष्टं नष्टशुभक्रियम् । तस्योपदेशदानेन मया कृतयं मनः सुखि. ॥ ४९ ॥
नीत्वा विभावरीं तत्र, विभाते विनिवृत्त्य च, । कुशलानुष्ठितिः कार्या, ममाप्यायुर्यतस्तनु. ॥ ५० ॥
मय्यनुग्रहबुद्ध्या त्वं हारं चन्द्रातपाभिधम् । दुरितानोकहद्रोणीकुठारमुररीकुरु. ॥ ५१ ॥
किलैष मथनस्यान्ते क्षीरोदेन हरेर्गृहम् । आश्रयन्त्यै श्रिये दत्तः कण्ठकाण्डस्य मण्डनम्, ॥ ५२ ॥
जयन्तजन्मनि प्रीत्या, पुलोमदुहितुस्तया । उपनीतश्चिरं चक्रे तयापि स्तनमण्डले, ॥ ५३ ॥
ततः प्रियङ्गुसुन्दर्या मत्प्रियायाः समर्पितः । सखीप्रेम्णा, तयाऽप्येष प्रमोदाद्विधृतश्चिरम्. ॥ ५४ ॥
अथ त्वागच्छता धर्मे तां नियुज्य सुकर्मणि । कण्ठे कृत्वा मयानीतस्तद्वियोगविनोदनम्. ॥ ५५ ॥
प्रथमप्रार्थनाभङ्गो न विधेयोऽधुना मम, । यद्दूरीभूत एवायमनाप्तेऽपि त्वयाऽधुना. ॥ ५६ ॥
मनुजेष्वाप्तसम्भूते कदाचिच्च करोत्यसौ । दृष्टेरिष्टां सुधासृष्टिं, सृष्टो येन ममेष्टया, ॥ ५७ ॥
देव्याः प्रियङ्गुसुन्दर्याः सञ्जाते मानुजे भवे. । यद्वाऽवलोकितः कुर्यादेष पुण्यक्रियोद्यमम्. ॥ ५८ ॥
भवतापि भवत्येवमुपकारः कृतो महान् " । इत्युक्त्वा सोऽर्पयामास हारं स्वात्कण्ठकन्दलात्. ॥ ५९ ॥
परोपकारव्यसनी ततीकृत्य करद्वयीं । जग्राह तं महीशोऽपि. सोऽपि देवस्तिरोदधे. ॥ ६० ॥
प्रविश्याथ चिरं स्तुत्वा युगादिपुरुषोत्तमम्, । गेहं जगाम, चक्रे च श्रियः सायन्तनार्चनम्. ॥ ६१ ॥
जगाद च–" भवद्भक्तेरनुभावोऽयमीदृशाम् । स्वर्गिणामपि यद्यान्ति मादृशा माननीयताम्. ॥ ६२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तद्दत्तोऽपि न मे स्पर्शं हारोऽयं तावकोऽर्हति " । इत्यूचिवांश्चकारासुं देव्याः पदयुगाश्रयम्. ॥ ६३ ॥
अत्रान्तरे मुखज्वालाविद्युद्दण्डातिडामरः, । कपालमालां बिभ्राणो बलाकावलिविभ्रमाम्, ॥ ६४ ॥
स्फुलिङ्गपिङ्गलस्फूर्जत्ताराखद्योतदीपितः, । नानावर्णोरगश्रेणिशक्रायुधविभूषणः, ॥ ६५ ॥
भीमाट्टहासविस्पष्टगर्जितोर्जितचेष्टितः, । सितदन्तप्रभावारिधाराधोरणिवन्धुरः, ॥ ६६ ॥
श्यामदेहप्रभाभारच्छन्नां निर्धूतकर्त्तिकाम् । दधानो दक्षिणे पाणौ निशाकरकलामिव, ॥ ६७ ॥
निरायातशिराजालः, व्यालमालातिसङ्कुलः, । प्रादुर्बभूव वेतालो जलकाल इवापरः. ॥ ६८ ॥ ( पञ्चभिः कुलकम् )
दृशा क्रमानुसारिण्या नखाग्रादाशिखं नृपः । विलोक्य, सस्मितं वाचा तमुवाच सुधीरया,–॥ ६९ ॥
" तव भीमाट्टहासेन जनितं नः कुतूहलम् !। विहस्यते वदैतत्किं महाभागासमञ्जसम् ? " ॥ ७० ॥
सोऽवोचत्,–" न किमप्यन्यत्, त्वदीयैव नृप ! क्रिया, । यदत्र मामतिक्रम्य प्रारब्धाराधना श्रियः. ॥ ७१ ॥
अहं हि सविधस्थायी नित्यमस्याः सदोऽग्रणीः, । मयि क्लृप्तोपचाराणां फलन्तीहितसिद्धयः. " ॥ ७२ ॥
अथोवाच महीपालः,–" तवैवेयं प्रमत्तता, । यज्जानतापि नास्माकमियमावेदिता स्थितिः. ॥ ७३ ॥
असमाप्तेऽधुना कल्पे पूजनीयो न कश्चनः । विवक्षितफलापेक्षामूरीकृत्येति निर्णयः. ॥ ७४ ॥
अर्थित्वं यदि पूज्यस्य भोज्येन, तदयं बलिः, । अस्मात् खाद यथाकाममाश्रित्यात्रैव कोणकम्. " ॥ ७५ ॥
" स जगादामिषाहारा वयं व्याघ्रा इवानिशम् । सहामहे न हीदृक्षं सुरास्तोत्रं द्विजा इव. ॥ ७६ ॥
आस्तां तावदिदं–दत्ताः कोटिशः समितस्त्वया, । तासु भूपतयोऽनेके कृतान्तातिथयः कृताः. ॥ ७७ ॥



For Private and Personal Use Only

न्यस्तचित्रलिपिन्यासं विश्वलक्षणलक्षितम् । पितृतर्प्पणपात्रं मे कपालं किञ्चिदर्प्पय." ॥ ७८ ॥
महीभुजाऽप्यथावादि-" सङ्गृहीतं न तन्मया, । यतो-न वेद्मि भावीदमुपयोगि भवादृशाम्. ॥ ७९ ॥
तदर्वाग् प्रतीक्षस्व. न क्षमश्चेद्विलम्बितुम् , । शिरस्तदा ममैवेदं गृहाण, यदि सद्गुणम्." ॥ ८० ॥
कर्णवर्त्ती कपालस्य करस्थस्याथ कर्त्तिकाम् । घृष्ट्वोपनेतुमारब्धो नृपायासौ प्रमोदवान्. ॥ ८१ ॥
आस्तां दिव्यास्त्र 'मित्युक्त्वा', नृपोऽपि स्फुरितप्रभम् । निजं निस्त्रिंशमादाय स्कन्धपीठे न्यपातयत्. ॥ ८२ ॥
अर्द्धविकृत्ते कण्ठे च भुजो रुद्ध इव स्थितः, । समत्सरोऽथ जग्राह कृपाणं सव्यपाणिना. ॥ ८३ ॥
व्यापारयंश्च यत्नेन, मूर्च्छया तुच्छचेतनः, । हाहारवं सुरस्त्रीणां सुश्राव श्रुतिपेशलम्. ॥ ८४ ॥
चक्षुस्तदनुसारेण क्षिपन्नम्बुजमध्यगाम् । श्रियं भामण्डलच्छत्रामपश्यत्सपरिच्छदाम्. ॥ ८५ ॥
उद्यद्भिभीषिकाशङ्कः प्राकृतामिव योषितम् । पप्रच्छ तां " शुभे! का त्वं ? किमर्थं वा समागता ? " ॥ ८६ ॥
सोवाच-"भूरिभूपालवृन्दवन्द्यपदाम्बुजा । लक्ष्मीरहं, तव स्वार्थसम्पत्त्यर्थमिवागता. ॥ ८७ ॥
किमिष्टं ब्रूहि ते कृत्यम् ? " अथोवाच नतो नृपः,-। " कुरु मह्यौ करौ, येन कुर्वे रक्षःपतेः प्रियम्." ॥ ८८ ॥
तद्वाचा विस्मिता देवी प्रत्युवाच-" न वेत्सि मे । स्वरूपं भूप!, मत्पार्श्वं सौम्य एव हि सेवते. ॥ ८९ ॥
नायं नक्तंचरः, किन्तु मम दौवारिकाऽग्रणीः । यक्षो महोदरोऽनेन तव सत्त्वं परीक्षितम्. ॥ ९० ॥
वदाभीष्टमहं तुष्टावष्टम्भेन तवामुना, । जगत्त्रयीगतं वस्तु सद्यः सम्पादयामि ते ". ॥ ९१ ॥
भूपोऽभ्यधात्-" प्रसादात्ते कङ्कणक्वाणसुन्दरैः । सुरदारैः सुरेन्द्रोऽपि चामरैर्वीज्यते दिवि, ॥ ९२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं चास्थिशकलं शङ्खश्चन्दनं नागचूसितम्, । सकलङ्कश्च शीतांशुर्वन्द्यास्ते त्वत्परिग्रहात्. ॥ ९३ ॥
किन्त्वेतदेव याचे,-ऽहमिक्ष्वाकुकुलभूभुजाम् । यथा न पश्चिमो जाये, देवी च मदिरावती ॥ ९४ ॥
यथा वीरप्रसूशब्दं नचिरादेव विन्दते, । तथा देवि ! विधेहीति." प्रसन्ना श्रीरथाब्रवीत्,-॥ ९५ ॥
" तवाशेषधराधीशप्राणप्रियपुरन्ध्रिभिः । विधीयमानशुद्धान्तवधूपदयुगार्चनः, ॥ ९६ ॥
निखातविजयस्तम्भश्चतुरर्णवसन्निधौ, । खेचराधिपभूपालसाम्राज्यपदपालकः, ॥ ९७ ॥
भविष्यत्यचिरात्पुत्रः, " इत्युदीर्य पुनर्नृपम् । जगाद-"योऽयं भक्त्या मे पूजायै कल्पितस्त्वया ॥ ९८ ॥
हारश्चन्द्रातपो नाम त्वदभ्युदयहेतवे, । स तस्यैव मया दत्तो, रक्षणीयोऽतियत्नतः, ॥ ९९ ॥
अर्पणीयश्च भूषार्थं स्वाङ्गजस्यैव यौवने, । विशेषात्सविधेर्धेयो दुर्गारण्यरणादिषु. ॥ १०० ॥
अनुजानीहि मामस्माद् गत्वा नन्दीश्वरादिषु, । भूयस्तत्रैव यातव्यं मया पद्माभिधे ह्रदे. ॥ १०१ ॥
गत्वाधुना राज्यधुरां भवानप्यधितिष्ठतु. " । इत्युक्त्वा, स्वाङ्गुलीयं च दत्वा बालारुणाभिधम्, ॥ १०२ ॥
तिरोदधे झगित्येव. नृपोऽपि कुशतल्पगः । ध्यायन् हारप्रभावादि तां निनाय विभावरीम् ॥ १०३ ॥
प्रभातावश्यकं कृत्वा देवतागृहवेदिकाम् । अध्यासामास, पौराश्च समागत्यानतिं विधुः. ॥ १०४ ॥
तेषामथोपविष्टानां वृत्तान्तादगमार्थिनाम् । श्रियः स्वस्थानयानान्तं व्याजहार निशागतम्. ॥ १०५ ॥
नन्दितस्तैरथादिक्षद्रत्नाध्यक्षं महोदधिम्-। " हारोऽयमर्च्यो भवता प्रधानमणिसन्निधौ, ॥ १०६ ॥
अङ्गुलीयमिदं प्राप्यं वज्रायुधचमूपतेः । गतस्य दुष्टसामन्तशिक्षायै दक्षिणापथम्, ॥ १०७ ॥



For Private and Personal Use Only

वाच्यो विजयवेगाख्यस्तत्सखश्च, यथा–' त्वया । निशायुद्धेषु संरोधे धार्यं वज्रायुधान्तिके ". ॥ १०८ ॥
तेन चाङ्गीकृतादेशः समुत्थाय निजालयम् । जगामानेकदेवार्चाव्यग्रराज्ञीपरिग्रहम् ॥ १०९ ॥
दण्डोऽङ्कुष्टभुजाकुम्भविद्याः कर्णपिशाचिकाम् । प्रश्नं कारयितुं जुष्टनैमित्तिककदम्बकम्. ॥ ११० ॥
यथाविधि कृतस्नानस्तत्र वारपुरन्ध्रिभिः । कृतावतारणस्तस्थौ क्षणं प्रणयिभिः सह. ॥ १११ ॥
' चैत्येषु यामः ' इत्युक्त्वा निषादिप्रगुणीकृताम् । वशामारुह्य सच्छत्रचामरः सपरिच्छदः ॥ ११२ ॥
ययौ शक्रावतारे,ऽथ कृतपूजः पुरीस्थिताम् । चैत्यावलीं नमस्कृत्य बभ्राम पुरि कौतुकात्. ॥ ११३ ॥ युग्मम्
निपीयमानलावण्यो लोचनैः पुरयोषिताम् । समाससाद मध्याह्ने भूयो राजनिकेतनम्. ॥ ११४ ॥
पट्टमध्यास्य धौताङ्घ्रिः क्षालयित्वा मुखाम्बुजम् । कृतकतिचिद्दण्डूषो ययावाहारमण्डपम्, ॥ ११५ ॥
भुक्त्वा चान्ते सताम्बूलो रम्यहर्म्यशिरःस्थिताम् । आरुह्य दन्तवलभीं क्रीडाभिरनयद्दिनम्. ॥ ११६ ॥
रवावस्ताद्रिपर्यस्ते कृतसन्ध्यासुरार्चनः । सारशृङ्गारनेपथ्यः प्रास्थितास्थानमण्डपम्, ॥ ११७ ॥
राजलोकं च सम्भाष्य, विसर्जितसभाजनः । वेत्रधारीभिरुक्ताध्वा शुद्धान्तमगमत्ततः. ॥ ११८ ॥
ज्योत्स्नावदातनेपथ्यां सज्जमाङ्गल्यधारिणीम् । तत्र स्मेरमुखच्छायां ददर्श मदिरावतीम्. ॥ ११९ ॥
दृष्ट्वा च विकसद्दृष्टिकृतप्रत्युद्गमस्तया । निवेश्य वामपार्श्वे तां निविष्टः कनकासने. ॥ १२० ॥
कृतावतारणः स्थित्वा नर्मालापैरथ क्षणम्, । सखीजनेषु सव्याजं निर्यातेषु निकेतनात् ॥ १२१ ॥
सानुरागं समालोक्य, संश्लिष्य, परिचुम्ब्य च, । तां निनाय नृपः शय्यां, सुष्वाप सहितस्तया. ॥ १२२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशाशेषेऽथ सोऽपश्यत्स्वप्ने स्तन्यं सुरद्विपम् । पिबन्तं मदिरावत्या गौर्या इव गणाधिपम्. ॥ १२३ ॥
माङ्गल्यातोद्यनादेन विनिद्रो मदिरावतीम् । प्रमोदपुलकच्छन्नां चक्रे च स्वप्नशंसनात्. ॥ १२४ ॥
क्षणं स्थित्वा ययौ राजा. स्नाता साऽपि ऋतुक्षणे । गर्भं बभार वर्षान्ते मूर्त्तिस्तेजो रवेरिव. ॥ १२५ ॥
ऐषीदुपचिते गर्भे श्रव्यदिव्यकथाश्रुतिम् । कुलाचलभुवि क्रीडामस्त्रसंहतिसन्निधिम् ॥. १२६ ॥
पूर्णेषु नवमासेषु सातिरेकेषु सा सुतम् । असूत शुभवेलायां सर्वसम्पन्नलक्षणम्. ॥ १२७ ॥
दत्त्वा सान्तोषिकं दानं पुत्रजन्मनिवेदिने । नृपोऽपि सूतिकागारमगादारब्धमङ्गलम्. ॥ १२८ ॥
नान्दीघोषैर्जयध्वानैर्वेदोद्गारैः सुरा अपि । कणकण्डूयनं चक्रुः पूर्णकर्णास्तदा ध्रुवम्. ॥ १२९ ॥
चक्रिचिह्नं सुतं दृष्ट्वा तुष्टो मोचितबन्धनः । षष्ठीजागरणे वृत्ते, सम्प्राप्ते दशमेऽहनि ॥ १३० ॥
पुरीजिनालयेष्वर्चां कृत्वा, दत्वाऽर्थिने धनम्, । 'हरिवाहन' इत्यस्य नाम स्वामानुगं व्यधात्. ॥ १३१ ॥
धात्रीकृतोपचारस्य क्रीडतः शिशुभिः सह । स्थितस्यान्तःपुरे तस्य वर्षपञ्चतयी गता. ॥ १३२ ॥
षष्ठे च वत्सरे पूजां कृत्वा विद्यागुरोर्नृपः । उपनिन्ये सुतं चित्रकृतनेपथ्यसम्पदम्. ॥ १३३ ॥
पारगं सर्वविद्यानां षोडशे हायने गते । आनिनायातिभूयस्या विभूत्या निजमन्दिरम्. ॥ १३४ ॥
विधाय मङ्गलं चास्य पुरो बहिरकारयत् । अदभ्रतोरणस्तम्भं कुमारभवनं महत्. ॥ १३५ ॥
यौवराज्याभिषेकं च कर्त्तुकामोऽस्य तत्समम् । अन्वियेष चरैरुर्व्यां तत्सहायं नृपात्मजम्. ॥ १३६ ॥
एकदा च सभासीनं सेवितं राजसूनुभिः । प्रविश्य भूलुठज्जानुः प्रतिहारी व्यजिज्ञपत्—॥ १३७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" वज्रायुधस्य सन्मित्रमागतो दक्षिणापथात् । आस्ते विजयवेगाख्यो देव ! द्वारि तवोत्सुकः. " ॥ १३८ ॥
स्मृत्वाङ्गुलीयं तद्वृत्तं जिज्ञासुरवनीपतिः । " प्रवेशयेति " तामाह, सा प्रणम्य विनिययौ. ॥ १३९ ॥
क्षणेन द्वारविन्यस्तलोचनोऽनुचरान्वितम् । अद्राक्षीद्विजयवेगं प्रविशन्तं नराधिपः. ॥ १४० ॥
दृष्ट्वा कृतस्मितो दूरात् तं नमन्तं समीपतः । दापितासनमप्राक्षीत् " कुशलं वाहिनीपतेः ? " ॥ १४१ ॥
स उवाच नतः " क्षेमं देव ! त्वत्पदचिन्तनात्, । पश्चाज्ञप्रणतिं ब्रूते मन्मुखात्पृतनापतिः. ॥ १४२ ॥
भीमादयोऽपि सद्भक्त्या भूपालकुलसम्भवाः । उत्तंसयन्ति देवस्य क्रमाब्जनखचन्द्रिकाम्. " ॥ १४३ ॥
इत्युक्त्वा पुनरप्याख्याद् " देव ! बालारुणाभिधम् । यदङ्गुलीयं देवेन प्रहितं वाहिनीपतेः, ॥ १४४ ॥
इयच्चिरं धृतं ये [ते] न सन्निधाने तदात्मनः; । वशीकृत्याधुना भूपान्मत्समीपे समर्पितम्, ॥ १४५ ॥
उपनीतं मयाऽप्यद्य रत्नाध्यक्षमहोदधेः. " । सकौतुकोऽथ भूपालः स्मेरवक्त्रस्तमब्रवीत्–॥ १४६ ॥
" अयि ! सेनापतेस्तेन किमप्युपकृतं रणे ? " स प्राहोपकृतं बाढं, कथयाम्यवधारय,–" ॥ १४७ ॥
" अतीतवर्षे वर्षासु व्यतीतासु चमूपतिः । ग्रहीतुं कुण्डनात्काञ्चीं ययौ कुसुमशेखरम्. ॥ १४८ ॥
सोऽपि स्वल्पबलत्वेन दातुं रणमपारयन् । विदधे दुर्गसंस्कारं कृतोपकरणग्रहः. ॥ १४९ ॥
प्राकारन्यस्तयन्त्रौघां गृहीतयवसेन्धनाम् । दह्यमानबहिःकक्षां दूषिताराज्जलाशयाम् ॥ १५० ॥
निषिद्धाज्ञातसञ्चारां योधगुल्मात्तगोपुराम् । चकार नगरीं काञ्चीमसारजनवर्जिताम्. ॥ १५१ ॥ युग्मम् ॥
सेनाधिपोऽपि तच्छ्रुत्वा विद्वद्धाटोपदुःसहः । पताकिनीभिरावेष्ट्य तस्थौ काञ्चीं समन्ततः. ॥ १५२ ॥

For Private and Personal Use Only

अथ यत्रास्म निरपृष्ट गजाली कुम्भकर्प्परम् । तत्तनाराचसम्पर्के गलत्स्वर्णकिरीटकम् (?) ॥ १५३ ॥
तृणापूलानलज्वालाप्रदीप्तकरिसारिकम् । खातवप्रतदां पुंसि बद्धस्पर्द्धतिरोहितैः (?) ॥ १५४ ॥
सामन्तानां बभूवास्य समरं प्रतिवासरम् । प्राकारशिखरारूढैः प्रत्यर्थिसुभटैः सह. ॥ १५५ ॥
एकदा तु मधौ प्राप्ते, स्मरोत्सर्वातथौ, निशि, । द्वितीययामे, यातेषु सामन्तेषु निजालयान्, ॥ १५६ ॥
संवृते विपणिव्राते, विबोधितजयद्विपः । शलाकास्फालनव्यग्रैः पञ्जरेणारिभिः श्रुतः ॥ १५७ ॥
निर्भरं भरिताभागो भुवनस्यातिभैरवः । अभूत्कलकलः कुर्वन् साटोपां सुभटावलीम्. ॥ १५८ ॥
नायकस्तं समाकर्ण्य जातावस्कन्दविभ्रमः । सखड्गफलको वेगान्निर्ययौ राज [ पट ] मन्दिरात् ॥ १५९ ॥
अथ सनद्धसन्नाहावायान्तौ सादिनौ पुरः । विपर्याणहयारूढौ दृष्ट्वा पप्रच्छ सत्वरम्–॥ १६० ॥
"अरे ! किमेष संक्षोभः ?" तौ प्रणम्याहतु "बलम् । दण्डनाथ ! विनिर्यातं काञ्च्युदीचीप्रतोलितः, ॥१६१॥
प्राप्तं च कटकाभ्यर्णे" तच्छ्रुत्वा पृतनापतिः । आदिष्टैराहृतं भृत्यैः रथमारुह्य निर्ययौ. ॥ १६२ ॥
अथ द्विपघटारूढा वेगात्सामन्तमण्डली । परिवारितवत्येनं वहन्ती समरोद्यमम्. ॥ १६३ ॥
परानीकमपि प्राप्य प्रवृत्तश्च महारणः । शस्त्रसंघट्टनिष्ठ्युतस्फुलिङ्गच्छिद्रितध्वजः. ॥ १६४ ॥
उद्दण्डपुण्डरीकालिमण्डितासु प्रियैः समम् । चक्रुः कीलालकुल्यासु पिशाच्यो जलखेलनम् ॥ १६५ ॥
क्षीयमाणेषु भूपेषु निपतत्सु पदातिषु । रात्रौ त्रिभागशेषायामनुज्ञातो नृपात्मजैः ॥ १६६ ॥
एका नृपकुमारोऽथ कुमारसदृशाकृतिः । पृच्छन् सदर्पः सेनान्यं राजकस्यान्तराविशत्. ॥ १६७ ॥ युग्मम्

" पश्य मामिति " सञ्जल्पन् दण्डनाथोऽप्यभूत्पुरः. । मर्माविधस्तयोश्चेरुर्दुर्जना इव सायकाः. ॥ १६८ ॥
अथ प्रीतेन सेनानीः कुमारेणाभ्यधीयत–। " दोर्दण्डकण्डूक्रीडा मे त्वयैव विहिता, परम् ॥ १६९ ॥
मुच्यसे मर्त्त्यसौख्यैस्त्वं, सावधानो भवाधुना. " । इत्युक्त्वा निशितैर्बाणैररुणुनाव चमूपतिम् ॥ १७० ॥
राजलक्ष्मीरथोरस्तः सेनान्योऽस्वस्थमानसा । चक्रे बाहुधनुच्छत्रखड्गादिषु गतागतम्. ॥ १७१ ॥
तामहं विपदं दृष्ट्वा तस्य मूढमनाः क्षणात् । स्मृतवानङ्गुलीयं तद्देवेन प्रहितं पुरा. ॥ १७२ ॥
जातोच्छ्वासश्चमूनाथमथात्रोचं–"कराङ्गुलौ । क्षिपैतत् " सोऽपि सासूयः कृतवानवधीरणाम्. ॥ १७३ ॥
प्रसारितकरस्यास्य कौक्षेयकजिघृक्षया । कोपकम्प्राङ्गुलिं पाणिं गृहीत्वाऽक्षिपमङ्गुलौ. ॥ १७४ ॥
तत्प्रभाभिः परामृष्टं परानीकमथाखिलम् । अवसन्नक्रियं सद्यः प्रत्यपद्यत निद्रया. ॥ १७५ ॥
अटनिन्यस्तशीर्षाणामूर्ध्वस्थानां धनुष्मताम् । स्वपतां मुष्टिविश्लिष्टाः पेतुर्भुवि शिलीमुखाः. ॥ १७६ ॥
उद्दामदानपङ्केषु मग्नामिव घनां सृणिम् । न शेकुर्गजगण्डेभ्यः समुद्धर्तुं निषादिनः. ॥ १७७ ॥
श्रुतारिसिंहनादेन सामन्तानां रुषारुणा । आदरस्फारिताप्यास्ते बलाद् दृष्टिर्मिलत्पुटाः. ॥ १७८ ॥
सेनानाथं कुमारोऽपि दृष्ट्वायातं सहासिनम् । त्यक्तचापः कृपाणस्य दष्टोष्ठः कुरुते ग्रहम्. ॥ १७९ ॥
स्यन्दनात्तसङ्ग एवाथ निद्रानिस्पन्दलोचनः । तथैव तस्थावास्माकी डुढौके च पताकिनी. ॥ १८० ॥
सेनाधिपोऽपि निर्व्याजवीर्यावर्जितमानसः । तां देवपादशपथैर्निवार्यागात् तदन्तिकम्. ॥ १८१ ॥
तं निद्रान्तमथाद्राक्षीद् भ्रकुटीसङ्कटालिकम् । वन्द्यमानव्रणोद्वान्तरक्तबिन्दुव्रजं भटैः. ॥ १८२ ॥

विलोक्य स्निग्धया दृष्ट्या सुचिरं प्रीतमानसः, । चामरग्राहिणीं तस्य पृष्टवानातिकौतुकात्. ॥ १८३ ॥
"कोऽयं ? सुकृतिनः कस्य तनूजः ? कास्य चाभिधा ? । कथं वा नामुना चक्रे वीरेणापि दिवा रणः ? " ॥१८४॥
अश्रु प्रमृज्य साऽवादीत्—"कीदृगेष निवेद्यते ? । अस्तंगता कथाऽप्यस्य, यदि वा कथ्यते, शृणु. ॥ १८५ ॥
सर्वद्वीपनृपापीडश्लिष्टक्रमनखार्चिषः । सिंहलाधिपतेरेष चन्द्रकेतोस्तनूद्भवः ॥ १८६ ॥
नाम्ना च समरकेतुर्द्वीपानां विजिगीषया । निर्यातः, पितुरादेशादागात्साहायकेऽत्र तु. ॥ १८७ ॥ युग्मम्
प्रातरद्य सशृङ्गारो मन्मथायतनं गतः । एष, भूपगृहोद्याने स्थितश्च सकलं दिनम्. ॥ १८८ ॥
पश्यत्पुरवधूवृन्दं यात्रान्ते च निशागमे । तत्रैव पङ्कजैः शय्यां कारयामास सव्यथः. ॥ १८९ ॥
अथाकस्मात्प्रदोषान्ते समेत्य शिबिरं निजम्, । सज्जीकृतबलोऽमात्यानवमन्य ससैनिकान् , ॥ १९० ॥
इमां भुवं समायातः." इति व्यावर्णिते तया । दुःखादिव गलत्तारा विरराम विभावरी. ॥ १९१ ॥
उद्गतेऽथ रवौ सर्वं प्रबुद्धं तद् द्विषां बलम्, । कुमारोऽपि चमूनाथमुवाचायातचेतनः. ॥ १९२ ॥
" मा गा विषादम्, प्रहर पूर्वम्, न प्रहराम्यहम् "। इत्युक्त्वा, रथं वीक्ष्य समन्तादरिवेष्टितम् ॥ १९३ ॥
आत्मानं च तथावस्थं, लज्जया मूढतां ययौ. । तत्प्रत्युज्जीवनात्तोषं दध्रे च ध्वजिनीपतिः. ॥ १९४ ॥
जयद्विपं समारोप्य, निनाय शिबिरं निजम्. । व्रणेषु पट्टबन्धादि क्रियां चक्रे ततः स्वयम्. ॥ १९५ ॥
तमाह "प्रगुणीभूतमाधिपत्यं गृहाण मे । 'तुच्छं' इत्यस्य नेच्छा चेत्, स्वमेवाध्यास्व सत्पदम्. ॥ १९६ ॥
'जितोऽहमिति'माज्ञासीः, कोऽहं तव पराजये ? । तद्दर्शयामि ते स्पष्टं, चेष्टाहानिर्यतोऽजनि," ॥ १९७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्त्वाऽदर्शयद्दिव्यमङ्गुलीयकं करस्थितम्. । 'क प्राप्तमिति' पृष्टश्च तद्वृत्तमखिलं जगौ. ॥ १९८ ॥
सोऽपि स्वस्मिन् गतावज्ञः प्राह–"सेनापते ! त्वया । गतगर्वतया चेतो दूरमावर्जितं मम. ॥ १९९ ॥
कृतार्थवादं शक्रेण, श्रिया दत्तवरं नृपम्, । मयि चेत्पक्षपाती स्याः, तदा तं मम दर्शय. " ॥ २०० ॥
अथ प्रीतः प्रसन्नेऽह्नि मया प्रचुरपत्तिना । सेवितुं देवपादान्तं प्रापयत्तं चमूपतिः." ॥ २०१ ॥
अथाहोत्कण्ठितो राजा–"सिंहलाधिपतेः सुतः । कास्ते ? कदा सहास्माभिः करिष्यति परिचयम् ? " ॥ २०२ ॥
सोऽवोचत्–"सरयूतीरे कृतसेनानिवेशनः । शक्रावतारोद्यानस्य मध्यभागे च तिष्ठति. ॥ २०३ ॥
दर्शनं तु भवत्पादप्रसादायत्तं" इत्यथ । प्रैषीन्महाप्रतीहारं हरदासं नराधिपः. ॥ २०४ ॥
सोऽनुरागं नृपस्योक्त्वा प्राञ्जलिस्तं नृपालयम् । आनिनाय. प्रणामं च भूमिभर्त्तुरकारयत्. ॥ २०५ ॥
प्रसारितभुजो राजाऽप्यङ्कमारोप्य तं क्षणम् । आश्लिक्षदासनासीनं सादरं समभाषत. ॥ २०६ ॥
"अङ्गुलीयार्पणव्याजाद्दूरादानीय वत्स ! मे । राजलक्ष्म्या प्रदत्तोऽसि द्वितीयकरत्वमात्मजः. ॥ २०७ ॥
अतोऽमुना कुमारेण समास्तव विभूतयः, । आस्व स्वैरमिह क्रीडन् निश्चलीकुरु मानसम्. ॥ २०८ ॥
हरिवाहनमप्याह–वत्स ! भूपतिनन्दने । भवेरिह स्थिरप्रेमा, मामुचः सहचारिताम्. " ॥ २०९ ॥
"आज्ञापयति यत्तात" इत्युक्त्वा हरिवाहनः । उत्तस्थावुत्थिते राज्ञि समं समरकेतुना. ॥ २१० ॥
गृहार्ह्य मदिरावत्या दत्तवस्त्रविभूषणम् । कृतस्तुतिं कुमारस्तं निनाय निजमन्दिरम्. ॥ २११ ॥
कृतेऽथ स्नानभुक्त्यादौ 'सुदृष्टिः' सार्थकाभिधः । प्रविश्याक्षपटलिकः, पट्टकस्थं नृपाज्ञया ॥ २१२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





काश्मीरादिभिराकीर्णं कुमारायोत्तरापथम्, । ददावङ्गादिदेशांश्च भुक्तौ समरकेतवे. ॥ २१३ ॥ युग्मम् ॥
शास्त्रशस्त्रकलाकेलिरसास्वादनिमग्नयोः । तयोरुपचितप्रीत्योर्गतोऽनेहाः कियानपि. ॥ २१४ ॥

एकदाऽथ निदाघर्त्तावारूढौ सिन्धुराधिपम् । तौ मत्तकोकिलोद्यानं जग्मतुः सरयूतटे. ॥ २१५ ॥
मन्मथायतनासन्नं, तत्राम्रवणमध्यगम् । तमालबकुलाशोकतालीतिलकमालितम्, ॥ २१६ ॥
कृतनीलांशुकोल्लोचं, वालव्यजनरश्मिभिः । चन्द्रकान्तप्रभापूरैः कीर्णकर्पूरपांसुरम्, ॥ २१७ ॥
[1]कुरुविन्दद्युता दत्तं कश्मीरजरसच्छटम् । शीतवारिकणासारैर्मुक्तमुक्तावलीलतम्, ॥ २१८ ॥
शाखानिलविधूताभिर्नृत्यन्तं वनराजिभिः, । आसेदतुर्युतावाप्तैः सहायैर्जलमण्डपम्. ॥ २१९ ॥ कलापकम्
तल्लावण्यं चिरं दृष्ट्वा तल्पमध्यास्य कौसुमम् । स्थितौ शास्त्रविनोदेन समं नृपतिसूनुभिः, ॥ २१० ॥
बन्दी 'मञ्जीरको'नाम नर्मपात्रं सभासदाम् । उपसृत्य ततः किञ्चिदुवाच हरिवाहनम्— ॥ २२१ ॥
" कुमार समतिक्रान्तचैत्रस्यास्यैव वासरे । अहं शुद्धत्रयोदश्यां कामायतनमागमम्. ॥ २२२ ॥
अपश्यं तत्र यात्रायां हेमशृङ्गोत्थितैर्जलैः । वेश्याङ्गनाभुजङ्गानामन्योऽन्यजलसेचनम्. ॥ २२३ ॥
तदङ्गणाम्रमूले च ताडीपत्रं व्यलोकयम् । नद्धं मृणालसूत्रेण स्तनचन्दनमुद्रितम्. ॥ २२४ ॥
सकौतुकं तदादाय, गेहं गत्वा निरूपितम् । पृष्ठे नामाक्षरश्रेणी न दृष्टोन्मुद्रितं ततः. ॥ २२५ ॥
अथ कस्तूरिकापङ्कलिखिता ललिताक्षरैः । कीर्णा कर्पूरचूर्णौघैरेकैवार्या विलोकिता. ॥ २२६ ॥



१. हिङ्गलोक.

For Private and Personal Use Only

विभाविता मयाभीक्ष्णं नैदम्पर्यागमोऽजनि । केन ? कस्य ? किमर्थं वा ? प्रेषितैषा भवेदिति. ॥ २२७ ॥
तदादिशतु मे तस्याः कुमारस्तत्त्वनिर्णयम्. " इत्युक्त्वा स इमामार्या पपाठोदारया गिरा– ॥ २२८ ॥
" गुरुभिरदत्तां वोढुं वाञ्छन् मामक्रमात्त्वमचिरेण । स्थातासि-पत्रपादपगहने तत्रान्तिकस्थाग्निः "॥ २२९ ॥
प्रज्ञाबलेन बुद्ध्वाथ कुमारोऽप्यवदत् "सखे ! । कस्याप्यपत्रपां त्यक्त्वा कयाचिदनुरागतः ॥ २३० ॥
मन्मथोत्तप्तचित्तस्य 'न दत्तः पितराविति' । विधिनाऽनुचितेनापि तामदित्सोरतिप्रियम् ॥ २३१ ॥
अनङ्गलेखः प्रहितः. प्रयोजनमिह त्विदम् । 'अपहारादिनोद्वाहो नोचितो, मोत्सुकीभव, ॥ २३२ ॥
सेत्स्यत्येतत्तवाभीष्टं यतः कतिपयैर्दिनैः. । मिलितोऽसि वने यत्र तत्र पत्रलशाखिभिः ॥ २३३ ॥
मद्भूत्या गोपितो, दीप्ते वह्नावुद्वाहमङ्गले । स्थातासि; मेऽनुयातायाः कर्त्तासि च करग्रहम्. ' ॥ २३४ ॥
यस्त्वत्र शापरूपोऽर्थः प्रतिभात्यपरो, यथा–'अदत्तां मामपन्यायाधादिच्छन्, सम्प्राप्य नारकम् ॥ २३५ ॥
अन्तिकस्थज्वलद्वह्निरसिपत्रवने घने । स्थातासि पातकाच्चीरम् ' असाविह निराश्रयः, ॥ २३६ ॥
नहि द्विष्टाः स्त्रियो लेखान् प्रेषयन्त्येवमादरात्. । इहातिगूढता यच्च च्छेकताविष्कृतिफलम्. ॥ २३७ ॥
'कौतुकोद्रेष्टनज्ञाततत्वार्था मन्त्रभेदनं । कुर्यात् पत्रकहारी बा कदाचिदिति ' गूढता. " ॥ २३८ ॥
इत्युक्ते तेन सर्वे ते तोषमियुः सभासदः, । वक्त्रविच्छायता चक्रे परं समरकेतुना. ॥ २३९ ॥
विस्मितेऽथ सभालोके वाचोयुक्तिविचक्षणः । उवाच कमलगुप्तः कलिङ्गाधिपतेः सुतः–॥ २४० ॥
" युवराज ! किमित्येवं मत्सरीव स्थितो भवान् । मौनमालम्ब्य ? किं वाऽभूच्चक्षुरश्रुकणाविलम् ? ॥ २४१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कच्चित्कुमारनिर्दिष्टं तं युवानं न शोचसि ? । किं शोच्यते ? विचित्रं हि संसारस्य विजृम्भितम्. " ॥ २४२ ॥
अथोवाच कुमारोऽपि–" किमाकस्मिकविक्लवः । चक्रे त्वयि गभीरेऽपि वयस्य ! सहसा पदम् ? " ॥ २४३ ॥
क्षणं मौनव्रतं स्थित्वा सिंहलाधिपनन्दनः । जगादाऽमानुषी सत्यं कुमार ! तव शेमुषी. ॥ १४४ ॥
उक्तो मद्दुःखवृत्तान्तो निजयैव धिया त्वया । सामान्यतो, विशेषं च कथ्यिद्वर्णयतः शृणु "– ॥ २४५ ॥
" ज्ञातमेव कुमारस्य सिंहलेषु यथा पुरी, । ' रङ्गशालेति, ' तत्रास्ति चन्द्रकेतुः पिता मम. ॥ २४६ ॥
कदाचित्सोऽत्वलिप्तानां पूर्वदायमयच्छताम् । सुवेलशैलसामीप्यवासिनां दुष्टभूभृताम् ॥ २४७ ॥
प्रतिक्षेपाय नौसैन्यं दक्षिणस्यां समादिशत् ,। यौवराज्ये च संस्थाप्य तत्र मां नायकं व्यधात्. ॥ २४८ ॥ युग्मम्
प्राहिणोच्च प्रशस्तेऽह्नि नृपामात्यादिभिः सह । संवीतं सितवासोभ्यां वारस्त्रीकृतमङ्गलम्. ॥ २४९ ॥
ततोऽहं कृतशृङ्गारमध्यास्यामरवल्लभम् । वज्राङ्कुशमहामात्रसज्जितं गन्धसिन्धुरम्. ॥ २५० ॥
उद्धूतवालव्यजनो ढक्काध्वानभृताम्बरः । छत्रालिच्छन्नमार्त्तण्डो निरगच्छं नृपालयात्. ॥ २५१ ॥
पुरमार्गेण यातो मे जालाबलिषु वीक्षितैः । चक्रुः कुवलयश्रेणिपूजां पुरपुरन्ध्रयः. ॥ २५२ ॥
अथार्णवानिलोद्धूतरम्यारामनोरमाम् । स्थानस्थानस्थसार्थौघैर्दुर्गीकृतगमागमाम् ॥ २५३ ॥
उल्लासिवल्लवीगीतैर्मन्थनीमन्थनस्वनैः । गोयूथघण्टानिर्घोषैः क्रूरकुक्कुरबुक्कनैः ॥ २५४ ॥
घरट्टघर्घरध्वानैः कण्डनष्टात्कृतैः कृते । येषु ब्रह्माण्डसंस्फोटे शङ्के जातो रसोर्णवः ॥ २५५ ॥
तैर्गोकुलैर्वृत्तां पश्यन् पुरसीमां समन्ततः । गृह्णन्वेलावनग्रामग्रामकूटोपदाग्रणान् ॥ २५६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रापमुल्लोलकल्लोलमालाच्छन्ननभस्तलम् । भगवन्तमपांनाथं दिवो ज्यायःसहोदरम् ॥ २५७ ॥ पञ्चभिः कुलकम्
यदुद्भवं समालोक्य वाचो वाचस्पतेरपि । वस्त्वन्तरस्तुतौ यान्ति कण्ठे गद्गदरूपताम्. ॥ २५८ ॥
तत्तीरसमभूभागे दत्तावासः परिग्रहम् । व्यग्रं गमनसामग्र्यां प्रत्यैक्षे द्विवासरान. ॥ २५९ ॥
अथान्येद्युः प्रतिष्ठासुः कृतपूजोऽर्णसांनिधेः । आगच्छमल्पपादातैर्बाह्यमास्थानमण्डपम्. ॥ २५० ॥
तत्र च प्रत्युषस्येव पौतिकानां कृताकृतम् । प्रेषितेन परिज्ञातुमायान्तं सह वेत्रिणा ॥ २६१ ॥
नीलाम्बुजलदश्यामं वसानं वाससी सिते । मालतीरचितापीडं पाटलौष्ठपुटच्छविम् ॥ २६२ ॥
वल्गन्मुक्तालताकान्तं सचन्दनललाटिकम् । अपश्यं धीवरव्रातैर्वृत्तं तरुणनाविकम्. ॥ २६३ ॥ विशेषकम्
दृष्ट्वा तं रुचिराकारं प्रेतमायपरिच्छदम् । सञ्जातविस्मयः 'कोऽयमि'त्यपृच्छं पुरःस्थितम् ॥ २६४ ॥
सर्वनौसाधनाध्यक्षं यक्षपालितनामकम्. । सोऽवादीत्–"सर्वकैवर्त्तवर्गस्यैषोऽधिनायकः." ॥ २६५ ॥
अवदं पुनर"प्येषां किमित्येष विलक्षणः ? " । स जगादाऽ"स्य वृत्तान्तं कुमार ! व्यासतः श्रृणु–॥२६६॥
अस्ति चामीकरद्वीपे पुरं मणिपुराभिधम्, । तत्र सांयात्रिकः श्रेष्ठी ख्यातो वैश्रवणाह्वयः. ॥ २६७ ॥
तज्जाया वसुदत्तेति, तारकश्च तदात्मजः । अधीतशास्त्रो निष्णातः कलासु सकलासु च. ॥ २६८ ॥
स भृत्वा सारभाण्डस्य यानपात्रमथैकदा । प्राप सांयात्रिकैः सार्द्धं रत्नशालामिमां पुरीम्. ॥ २६९ ॥
आवासितस्य तीरान्ते तोयधेर्जलकेतुना । कैवर्त्तकुलनाथेन सहाभूत्तस्य सौहृदम्. ॥ २७० ॥
पुत्री सुदर्शना ( प्रियदर्शना ) नाम जलकेतोरथान्यदा । तद्गृहं हारमादाय गता स्वपितुराज्ञया. ॥ २७१ ॥

For Private and Personal Use Only

तद्दर्शनादभूत्तस्या दृढरागातुरं मनः, । कृतप्रत्युपचारा च पुनः स्वगृहमाययौ. ॥ २७२ ॥
यान्ती च तद्गृहं व्याजादेकदा तद्गृहाङ्गणे । तं दृष्ट्वा स्खलिता, तेन विधृता करपल्लवैः. ॥ २७३ ॥
उक्ता च सस्मितं "सुभ्रु ! समेपि स्खलितं किमु ? । मुञ्च क्षोभं गच्छ." साप्यवादीत्समन्मथा–॥२७४॥
"इदमेवाश्रयो गेहं कुमार ! मम तावकम्. " । लिलेख भूमिमित्युक्त्वा चरणाङ्गुष्ठलेखया. ॥ २७५ ॥
असावपि सकन्दर्प्पः 'स्त्रीरत्नं दुष्कुलादपि । ग्राह्यमि'त्यवधार्यास्याः पाणिं जग्राह पाणिना. ॥ २७६ ॥
'सांयात्रिकस्य पुत्रीयं पालिता जलकेतुना । यानभङ्गे'इति प्रोक्तोऽप्यात्मीयैस्तत्त्ववेदिभिः, ॥ २७७ ॥
अभ्यर्थितोऽपि चात्यर्थं स्वदेशगमनं प्रति, । आनायितोऽपि पित्राऽयं, तस्थावत्रैव सन्नपः. ॥ २७८ ॥ युग्मम्
देवेन सद्गुणाकृष्टचेतसा चन्द्रकेतुना । सर्वनाविकतन्त्रस्य निर्मितश्चाधिनायकः. ॥ २७९ ॥
विहिता बहुशोऽनेन तोयराशौ गमागमाः । सख्येनास्य सुखेनाब्धिं कुमारो लङ्घयिष्यसि. ॥ २८० ॥
तारकोऽपि प्रणम्याथ जगाद–"प्रगुणीकृता । कुमार ! यानपात्राली, गृहीतं ग्राह्यवस्तु च. ॥ २८१ ॥
नाम्ना 'विजययात्रेति' भवते सज्जिता तरी, । न चेत्कालविलम्बेऽस्ति हेतुः, प्रस्थीयतां ततः" ॥२८२॥
अहं तु शुभवेलायां विसृष्टनगरप्रजः । आरोहं तारकन्यस्तहस्तो नावं नतार्णवः. ॥ २८३ ॥
स्वस्वपोतानथारोहन् सर्वेऽपि नृपसूनवः । मङ्गलातोद्यवृन्दानि दध्वनुः पूरिताम्बरम्. ॥ २८४ ॥
तारकेरितया नावा गाहमानोऽथ सागरम् । साधितान्तरसामन्तः सुवेलाचलमव्रजम्. ॥ २८५ ॥
लङ्कापरिसरोद्देशानुत्स्वातारोपितैर्नृपैः । तत्रत्यैर्दर्शितान् पश्यन्, तत्रास्थां कतिचिद्दिनान्. ॥ २८६ ॥



For Private and Personal Use Only

धृत्वा तत्रैव शिबिरमन्यदा प्रेरितश्चरैः । अचलं सारसैन्येन सेतोः पश्चिमया दिशा. ॥ २८७ ॥
अवरकन्दात् किरातेशं जित्वा पर्वतकाभिधम् । तदन्तःपुरमादाय शिबिराभिमुखोऽभवम्. ॥ २८८ ॥
अथ त्रिभागशेषायां रात्रावादिप्रयाणके । अत्रिनामा समागन्ष भट्टपुत्रो जगाद माम्–॥ २८९ ॥
"विज्ञापयति सेनानीः–'कुमार ! गगनस्पृशा । योऽयं शिखरजालेन पर्वतोऽग्रे विलोक्यते, ॥ २९० ॥
द्वीपस्य पञ्चशैलस्य चूडारत्नं, पयोनिधेः । लीलोत्तंसो,ऽतिरम्यश्री रत्नकुटोऽयमाख्यया. ॥ २९१ ॥
सैन्यश्रमापनोदाय, जलादिग्रहणाय च, । स्थित्वा द्वित्रादिनान्यत्र, पुरो यात्रा विधीयते. " ॥२९२ ॥
"एवमस्त्विति" संलप्य विसृष्टे तत्र, सा चमूः । निवासं ग्राहिता तस्य गिरेरासन्नसानुषु. ॥ २९३ ॥
अथ कर्णामृतस्यन्दी पश्चिमोत्तरदिक्पथात् । दिव्यगीतारवस्तत्र सातोद्यध्वनिरराययौ. ॥ २९४ ॥
तस्याथ प्रभवं द्रष्टुं सञ्जाताधिककौतुकः । अवोचं तारकं तत्र सावधानं ध्वनिश्रुतौ,–॥ २९५ ॥
"सखे ! गीतध्वनिः श्रव्यो ममाकर्षति मानसम्, । यदि तेन तथा खेदस्तदा यामस्तदन्तिकम्. ॥२९६॥
महाराजाभिषेको वा, यात्रा वा क्वापि दैवते, । कस्यापि विद्यासिद्धिर्वा नूनमत्र भविष्यति. ॥ २९७ ॥
स जगाद–"कुमारात्र दुर्गमोऽतीव वारिधिः, । गमेच्छा तु ममाप्यस्ति, मयाप्येष पुरा श्रुतः. ॥ २१८ ॥
कर्णधारा इहान्येऽपि शृण्वन्त्येनमनेकशः, । अस्य प्रवर्त्तको ज्ञातः कुतोऽपि न तु कश्चन. " ॥ २९९ ॥
इत्युक्ते तेन सञ्जातविशिष्टतरकौतुकः । पुनस्तमब्रुवं–"यामः सखे ! तत्र यथा तथा". ॥ ३०० ॥
सहायानथ सङ्गृह्य पञ्चषान् कर्णधारकान् । सज्जीकृत्य तरी तेन मय्यारूढे प्रवाहिता. ॥ ३०१ ॥

स्फुरितं दक्षिणं चक्षुः, स्यन्दितश्च ममाधरः, । परांहसाऽथ नौर्यान्ती नादाश्रयनगान्तिकम्. ॥ ३०२ ॥
विरराम ध्वनिः सोऽथ मामवादीच्च तारकः, । "कुमार ! विरतस्तावद् ध्वनिर्मार्गोपदेशकः. ॥ ३०३ ॥
गम्यते वा नवेदानीमहं तस्थावधोमुखः । ध्यायन्मुधाफलं चित्ते स्वकं चापलचेष्टितम्. ॥ ३०४ ॥
अथोदयाद्रिचूडायां ताम्रचूडस्य चूडया । स्पर्द्धमानं रुचाभासीदशीतकरमण्डलम्. ॥ ३०५ ॥
ततोऽक्षिपं पुरश्चक्षुरदूरे तस्य भूभृतः, । अपश्यं च प्रभाभारं भासयन्तं नभःपथम्. ॥ ३०६ ॥
दृष्ट्वा 'किमेतदि'त्यूहन्नद्राक्षं खेचरावलीम् । निर्गत्य तस्मादायान्तीमाकाशेनैकहेलया. ॥ ३०७ ॥
वल्गद्वाजिव्रजारूढनायकां दिव्यतेजसम् । विस्तारतारहारालीकरशारीकृताम्बरम् ॥ ३०८ ॥
दृष्ट्वा च तं प्रभाराशिं, तां च नाभश्चरीं चमूं । "प्रवर्त्तय पुरो नावमिति" तारकमभ्यधम्. ॥ ३०९ ॥
"कोऽयं ? कस्मात् ? किमर्थं वा ? कथं वात्र समागतः ?" । जल्पद्भिरिति साश्चर्यं दृश्यमानो नभश्चरैः ॥ ३१० ॥
गत्वा स्तोकमधस्तस्य भूधरस्य, व्यलोकयम् । हेमाद्रिभास्वराकारं चलच्चीनांशुकध्वजम् ॥ ३११ ॥
अच्छस्फटिकनिष्पन्नप्राकारपरिवेष्टितम् । रत्नरूपकराजीनां रोचिषा रुद्धदिक्पथम्. ॥ ३१२ ॥
पद्मरागमणिश्रेणिनिर्मितामलसारकम् । दिव्यायतनमुत्तुङ्गमेकमत्यद्भुताकृति ॥ ३१३ ॥
दृष्ट्वा चाचिन्तयं, "धन्याः, पत्रिणोऽप्यत्र ये स्थिताः, । वन्द्यः कोऽपि सुकर्मासाविदं येन विधापितम्. ॥ ३१४ ॥
स्वःशिल्पिटङ्कविच्छिन्नमणिग्रावोच्छलद्दलैः । क्षारोदोऽप्यस्य निष्पत्तौ शङ्के रत्नाकरोऽजनि." ॥ ३१५ ॥
इति ध्यायत एवासौ कैवर्त्तकरनोदनात् । क्षणेन दक्षिणां भित्तिं प्राकारस्याससाद नौः. ॥ ३१६ ॥



For Private and Personal Use Only

विस्मयस्मेरलोलाक्षमवोचमथ तारकम्-। "सखे ! सन्तानकादीनां पुष्पाणि, मधुरं जलम्, ॥ २१७ ॥
सानोरस्मात्समादत्स्व, शुचयो देवतार्चनम् । येनात्र कुर्महे" सोऽपि सस्मितं प्रत्यभाषत-॥ ३१८ ॥ युग्मम् ॥
"कुमार ! यदिदं द्वारं पुरतस्तुङ्गतोरणम्, । तद्भ्रमेणैव संरुद्धं शलोच्चकटकस्पृशा. ॥ ३१९ ॥
क्षुद्रद्वाराणि जानीहि, तान्यपि स्वच्छतागुणात् । प्राकारस्य नभस्तुल्यभित्तेर्यान्ति न लक्ष्यताम्. ॥ ३२० ॥
तदत्रैव स्थितास्तावदस्माद्देवनिकेतनात् । बहिः कञ्चन निर्यान्तं पश्यामो द्वारसूचकम्." ॥ ३२१ ॥
अथायतनवापीनां हंसैर्वलितकन्धरम् । आकर्णितो, गतः पोषं रसनादामसिञ्जितैः, ॥ ३२२ ॥
गम्भीरो हाररणितैः, श्रव्यः कङ्कणनिक्कणैः, । झात्कारो नूपुरालीनामुच्चचार मनोहरः. ॥ ३२३ ॥
तमनुक्षिप्तचक्षुश्च प्राकारशिरसि स्थिताः । सपक्षशैलानन्वेष्टुं वज्रार्चिष इवागताः, ॥ ३२४ ॥
जाड्यादुच्चैःस्थिताः स्थाने देवता इव वारिधेः, । हैमीरायतने तत्र पताका इव निर्मिताः, ॥ ३२५ ॥
अद्राक्षं, नयनक्षेपैर्नवनीलसरोरुहाम् । उपहारमिवाम्भोधेः कुर्वतीर्वरकन्यकाः. ॥ २२६ ॥
तदन्तर्ललितोद्धूतचारुचामरवीजिताम्, । ददन्तीं दुर्भगाभावं लावण्येन रतेरपि, ॥ ३२८ ॥
कलामिव विधेः सारां तारिकानिकरावृताम्, । द्विरष्टवर्षदेशीयां कन्यामेकां व्यलोकयम्." ॥ ३२८ ॥
इति शंसति वृत्तान्तं सिंहलद्विपनन्दने । अलोलपक्ष्मलेखेषु जनेषु लिखितेष्विव, ॥ ३२९ ॥
स्मेरचक्षुः प्रतीहारी प्रविश्य हरिवाहनम् । व्यजिज्ञपत्-"कुमारेदमीक्ष्यतां नयनामृतम्." ॥ ३३० ॥ युग्मम् ॥
इत्युक्त्वा ढौकयामास चेलाञ्चलनियन्त्रितम् । दिव्यचित्रपटं, सोऽपि वीक्षामासातिविस्मयात्. ॥ ३३१ ॥

अथापश्यदनङ्गस्य हस्तभल्लीमिवार्पिताम् । कन्यारूपधरामेकामुदारां चित्रपुत्रिकाम्. ॥ ३३२ ॥
प्रत्यङ्गं वीक्ष्य, शेषाणां तदीक्षोत्सुकचेतसाम् । चन्द्रकेत्वात्मजादीनां दर्शयामास सादरम्. ॥ ३३३ ॥
वेत्रधारीमपृच्छच्च–"क्वेदं वज्रार्गले ! त्वया । चित्रमासादितं ?" सापि किञ्चिन्नम्रा तमब्रवीत्–॥ ३३४ ॥
"अशून्यं द्वारमाधाय कुमारोद्यानसम्पदम् । गतया द्रष्टुमासीनो माधवीमण्डपाङ्गणे ॥ ३३५ ॥
एको रम्याकृतिर्दृष्टो मया पथिकदारकः. । पृष्टाऽहं तेन "कल्याणि ! कोऽयं ? कस्य तनूद्भवः ? ॥ ३३६ ॥
किं नामा राजपुत्रोऽयं ?" मयापि सरलाशयम् । तं विलोक्याभिधायीदं "शृणु सौम्य ! निवेदये–॥३३७॥
'राजलक्ष्मीनिवासाय जङ्गमः कमलाकरः, । चित्रस्थानायिताकारः कन्याभिर्भुवि भूभृताम्, ॥ ३३८ ॥
निःसीमसाहसायातराजलक्ष्मीवरार्पितः । मेघवाहनभूभर्त्तुः पुत्रोऽयं हरिवाहनः' ॥ ३३९ ॥
दिदृक्षा चेत्तदागच्छ दर्शयामी" ति जल्पिते । स उवाच हृष्टश्च–"द्रागेवानुगृहाण माम्. ॥ ३४० ॥
दिव्यकन्याकृतिं चैतां तस्य कौशलिकं कुरु, । प्राप्त एवाहमप्येष." इत्युक्त्वार्पितवान् पटम्." ॥ ३४१ ॥
स तस्यामिति जल्पन्त्यां चक्षुर्गोचरमाययौ । युक्तोऽसिधेनुकामात्रसहायेन पदातिना. ॥ ३४२ ॥
दिव्यपट्टांशुकच्छन्नो भास्वद्भूषणभासुरः । दधानः शेखरामोदभ्राम्यद्भृङ्गौघसिक्किरीम्. ॥ ३४३ ॥ युग्मम् ॥
प्रवेशितः प्रतीहार्या प्रणम्य हरिवाहनम् । उपविष्टः, कुमारस्य रूपेण मुमुदेतराम्. ॥ ३४४ ॥
अवादीच्च–"कुमारास्ति दृश्यं चित्रेऽत्र किञ्चन ? । दोषः कोऽपि न विस्पष्टः ? शिक्षार्होऽहं भवादृशाम्." ॥३४५॥
प्रत्यवादीत् कुमारस्तं–"भवान् स्रष्टाऽस्य कर्मणः, किमत्र शिक्ष्यते ? को हि ज्योत्स्नां लिम्पति चन्दनैः? ॥ ३४६ ॥

किन्त्वेक एव दोषोत्र,–"यदेकमपि निर्मितम् । न रूपं पुरुषस्येति' तत्सम्प्रत्यपि तत्कुरु." ॥ ३४७ ॥
स प्रत्युवाच–"सामान्यकन्यारूपं मया नहि । कुमार ! लिखितं, किन्तु द्वेषिण्याः सततं नरे. ॥ ३४८ ॥
नृरूपनिर्मितौ द्रष्टुं नैपुण्यं चेत्कुतूहलम् , । कुमारस्यैव सद्रूपमतो लेख्यं तदेव हि. ॥ ३४९ ॥
कारणं विद्यते किञ्चित्किञ्चेदानीमलेखने । तद्वर्णयामि संक्षेपादाकर्णयतु पुण्यभाक्–॥ ३५० ॥
" अस्ति भूभृति वैताढये चूडालङ्करणं भुवः । रथनुपूरशब्दाद्यं चक्रवालाभिधं पुरम् ॥ २५१ ॥
समग्रदक्षिणश्रेणेः पाता प्रौढपराक्रमः । विद्याधराधिपस्तत्र चक्रसेनाह्वयो नृपः ॥ ३५२ ॥
विषयान् सेवमानस्य तस्य देव्यामथाजनि । पत्रलेखाभिधानायां पुत्री 'तिलकमञ्जरी. ॥ ३५३ ॥
न्यस्तश्चित्रपटेऽमुष्मिन् दृष्टिपातप्रसादतः । लावण्यनिधिना यस्या रूपांशः सफलीकृतः. ॥ ३५४ ॥
प्रपेदे यौवनं साथ कामकेलिनिकेतनम् , । योग्येव सर्वभूतीनां पित्रा सा भाजनं कृता. ॥ ३५५ ॥
अनुज्ञाता च सद्वेषैः समं विद्याधरीगणैः । व्योमलीलाविहारेण शैलेषु मलयाद्रिषु. ॥ ३५६ ॥
युत्त्या प्रवर्त्तमानाऽपि बन्धुवृद्धाभिरन्वहं । विधत्ते नाभिलाषं तु स्वप्नेऽपि नरसन्निधेः, ॥ ३५७ ॥
यद्दृच्छाच्छेदभीतेर्वा, केनापि नियमेन वा, । किंवा जन्मान्तरायातनृविशेषानुरागतः. ॥ ३५८ ॥ युग्मम्.
विषण्णया च तन्मात्रा मन्त्रजापविधानतः । प्रज्ञप्तिविद्या विज्ञप्ता, तया स्वप्ने निवेदितम्. ॥ ३५९ ॥
" वत्से ! नमन्नृपश्रेणिचूडाचुम्ब्यपदाम्बुजः । भूगोचरनृपोत्पन्नः पतिरस्या भविष्यति. ॥ ३६० ॥
प्रेमपात्रं परं चैषा जन्मान्तरसखी श्रियः, । त्वत्सुता सुकृतेर्जाता, द्रष्टव्या सादरं ततः. " ॥ ३६१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तया च सर्वभूपालकुमाराकृतिदर्शनात् । कर्त्तु तिलकमञ्जर्या जातरागरसं मनः ॥ ३६२ ॥
सैरन्ध्रीनिवहश्रेष्ठा चित्रलेखेति नामतः । माता मे भर्तृपुत्र्याश्च धात्री प्रातर्निरूपिता. ॥ ३६३ ॥ युग्मम्
" सखि ! चित्रे प्रवीणा त्वं, वत्सा चात्रानुरागिणी, । तत्सर्वभूपपुत्राणामस्या रूपाणि दर्शय. ॥ ३६४ ॥
कदाचिदनुरागोऽस्या जायेतेति" ततश्च सा । दासीश्चित्रविधौ दक्षाः प्रेषयामास सर्वतः. ॥ ३६५ ॥
मामप्युवाच—"व्यापारो गन्धर्वक ! तवाप्ययम्. । किन्तु देव्या सुवेले त्वं प्रहितः पत्रलेखया ॥ ३६६ ॥
विचित्रवीर्यदेवस्य समीपे स्वपितुः,ततः । निष्पन्नराजकार्येण तस्मादागच्छता त्वया ॥ ३६७ ॥
विज्ञाप्यः खेचराऽधीशो—"या सा काञ्चीपुरीपतेः । देवी गन्धर्वदत्तेति नाम साम्यादनिश्चिता ॥ ३६८ ॥
कृतयात्रेण देवेन तत्र चैत्ये स्वयंभुवि । श्रुता, सा 'सैव देवस्य पुत्री गन्धर्वदत्तिका' ॥ ३६९ ॥
यतो—मया स्वयं पृष्टा, स्वप्रवासस्तयापि मे । वैजयन्तीपुरोत्पातादारभ्य कथितोऽखिलः. " ॥ ३७० ॥
आगच्छता च गन्धर्वदत्तामालोक्य सत्वरम् । आगन्तव्यं, सहायश्च तवायं चित्रमायकः. ॥ ३७१ ॥
सिद्धा साम्प्रतमेवास्य विद्या हि बहुरूपिणी. " । तदत्र राजकार्ये मां कुमारो मोक्तुमर्हति. ॥ ३७२ ॥
व्यावृत्तेन कुमारस्य रूपं लेख्यं तथा मया, । भर्तृपुत्री तदालोकाद्यथा रागमयी भवेत्. " ॥ ३७३ ॥
दत्ताभरणवस्त्रादि कुमारः स्वकरार्पितम् । सिंहलेशतनूजेन लेखं तस्योपनीतवान. ॥ ३७४ ॥
तदर्थज्ञो जगादैनं—"दुहितुः काञ्चिभूपतेः । त्वया मलयसुन्दर्या प्रापणीयो रहस्ययम्. " ॥ ३७५ ॥
'तथे'त्यभ्युपगम्यासौ प्रणम्योत्पतन्नभः । क्षणं स्थित्वा कुमारोऽपि जगाम निजमन्दिरम्. ॥ ३७६ ॥



For Private and Personal Use Only

कृताह्निको दिनं नीत्वा, चित्रकन्यावलोकनात्, । कृत्वा सान्ध्यं, ययौ वेश्म भूपतेः सपरिच्छदः. ॥ ३७७ ॥
उपास्य पितरं, नत्वा जननीं च, निजालयम् । अगाद्विसृष्टलोकश्च प्राविशद्वासवेश्मनि. ॥ ३७८ ॥
तल्पमध्यास्य वारस्त्रीसंवाहितपदाम्बुजः । चक्रसेनसुतारूपध्याननीरुद्धमानसः ॥ ३७९ ॥
तरङ्गितोत्तरपटः पर्यङ्कपरिवर्त्तनैः । शतयामामिवानषीद्यामिनीं कथमप्यसौ. ॥ ३८० ॥
प्रातः प्रक्लृतनस्यान्ते विधेः सह पदातिभिः । तदेवोद्यानमगमत्, तस्थौ चित्रं विलोकयन्. ॥ ३८१ ॥
उपस्थिते च मध्यान्हे, तत्रैवार्चितदैवतः । भुक्त्वा,गृहीतताम्बूलः स्थित्वा सावसथं ययौ. ॥ ३८२ ॥
कारणानि समाचिन्वन् गन्धर्वकविलम्बने, । कृच्छाप्तनिद्रः क्लेशेन गमयामास शर्वरीम्. ॥ ३८३ ॥
इत्थं दिनेषु गच्छत्सु गन्धर्वकविलम्बनात्, । चक्रसेनसुताप्राप्तौ शिथिलाशो बभूव सः. ॥ ३८४ ॥
अथैकदा, शरत्प्राप्तौ तच्चेतनसमुद्भवात् । उद्वेगात्सदने स्थातुमसहः क्षणमप्यसौ. ॥ ३८५ ॥
स्वमण्डलदिदृक्षायामुद्दश्यातिकुतूहलम् । पितरं मन्त्रिवक्त्रेण सप्रणामं व्यजिज्ञपत्. ॥ ३८६ ॥
अनुज्ञातगमस्तेन समं समरकेतुना । मित्रैरन्यैश्च नगरात्प्रशस्तेऽहनि निर्ययौ. ॥ ३८७ ॥
वहन्नध्वनि तत्रत्यराजलोकैर्निवेदिताः । पश्यन्नगनदीग्रामधर्मारण्यादिसंहतीः, ॥ ३८८ ॥
कामरूपमनुप्राप्य तत्र प्राग्ज्योतिषाधिपः । धृतवानसमप्रीतिस्तं दिनानि कियन्त्यपि. ॥ ३८९ ॥
तं च तत्रस्थितं श्रुत्वा सर्वेऽप्यौदीच्यभूभृतः । प्राभृतैः स्वस्वदेशोत्थैः समागत्य सिषेविरे. ॥ ३९० ॥
विचचार सामन्तैश्च लौहित्याद्रिवनालिषु । तत्प्रेरितः क्षणं चक्रे विनोदं मृगयागतम्. ॥ ३९१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





करीन्द्रसाधनाध्यक्षः पुष्कराक्षो व्यजिज्ञपत् " कुमार ! यामिनीयामे चरमे मदगन्धतः ॥ ३९२ ॥
गतो वनं हठाद्वैरियमदण्डाभिधः करी । प्रातर्दृष्टः समानेतुं यत्नेनापि न पारितः. ॥ ३९३ ॥
तस्मादादिश्यतां कश्चित्, नोचेद्दूरीभविष्यति" । " वयमेव ग्रहीष्यामः" इत्युक्त्वा शिबिरस्थितम् ॥ ३९४ ॥
विधाय कमलगुप्तमारुह्य वरवाजिनम्, । स्तोकपत्तिवृतः सार्द्धं सिंहलेश्वरसूनुना, ॥ ३९५ ॥
महामात्रोपदिष्टाध्वा जगाम जवतो वनम् । वनेभदानसंसिक्तं, सानौ परिणतं रुषा ॥ ३९६ ॥
तत्रालुलोके करिणं दूरस्थाधोरणावृतम्. । हयादुत्तीर्य रुद्धोऽपि साशङ्कं नृपसूनुभिः ॥ ३९७ ॥
मन्दं मन्दं चचालाथ वीणापाणिर्गजं प्रति. । तदन्तिकलतागुल्मे ताडयामास वल्लकीम् ॥ ३९८ ॥
आकर्ण्यमानां मौनस्थैः कुञ्जावस्थितकिन्नरैः. । तदारवं समाकर्ण्य, विचैतन्य इव क्षणम् ॥ ३९९ ॥
तस्थौ करी. कुमारोऽपि त्वरया तमुपासृपत्. । गत्वा च लीलयाऽऽरोहदथ तत्क्षणमेव सः. ॥ ४०० ॥
करी चचाल साटोपः तस्माच्छैलोपकण्ठतः. । " अङ्कुशोऽङ्कुशः " इत्युक्ते कुमारेणानुधावितैः ॥ ४०१ ॥
परिकरैर्जवाद्दृष्टः दूरोच्छलितशृङ्खलः. । ' एष यात्येष यात्येवं ' राजलोकेन दर्शितः ॥ ४०२ ॥
झगित्येवातिचक्राम तेषां लोचनगोचरात्. । कुमारहरणोदन्तमथाकर्ण्य समन्ततः ॥ ४०३ ॥
अधावत हयारूढानीकनायकसन्ततिः. । सिंहलाधिपसूनुश्च राजसूनुगणावृतः ॥ ४०४ ॥
बलेन वाजिनां पश्चादवहत्सकलं दिनम्. । अस्ताचलस्थिते भानौ राजपुत्रानुरोधतः ॥ ४०५ ॥
वासं जग्राह. नाहारमग्रहीत्कथमप्यसौ. । तुरङ्गपृष्ठास्तरणे निषण्णश्चानयन्निशाम्. ॥ ४०६ ॥



For Private and Personal Use Only

अनिष्टानि कुमारस्य तानि तानि विचिन्तयन. । प्रातः पुरःप्रतिष्ठासुः " गतिर्नाग्रे तुरङ्गिणाम् " ॥ ४०७ ॥
इत्युक्तः सर्वतः पत्तीन् प्रेष्य, तस्थौ स्वयं पथि, । त्यक्ताहारः सुहृद्वार्त्तामपृच्छदखिलानध्वगान. ॥ ४०८ ॥
निश्यावासगतश्चास्थाद् गाढान्तर्दाहवेदनः. । स्थितः पथि पुनः प्रातर्महामात्रानुपातनम् ॥ ४०९ ॥
कुर्वन. दूरादपश्यत्तान् विद्राणवदनाम्बुजान् , । " मृगाधमगतेर्मार्गेः किं दृष्टः " इति पृष्टवान्. ॥ ४१० ॥
त ऊचुः " सोऽपि पापात्मा दृष्टो नास्ति, किमु प्रभुः ? " छन्नववत्रोऽथ वस्त्रेण "हा ! समस्तकलालय ! ॥४११॥
हा सखे ! हा ! बुद्धेत्यादि " विललाप पुनः पुनः. । राजभिर्बोधितः कृच्छ्राद्गत्वा वासं कुशास्तरे ॥ ४१२ ॥
नीत्वा निशां प्रगे कालं कर्त्तुमैषीत्सुदुःखितः । आगत्योवाच राजन्यान् " किमेवमिह तिष्ठथ ? ॥ ४१३ ॥
भवद्भिर्विहितं कृत्यं कुमारान्वेषणादिकम्, । याताऽयोध्यां समर्प्यतां कुमारोपार्जितां श्रियम्. ॥ ४१४ ॥
सेवध्वं कोशलाधीशं, कालः कार्यो मयाऽधुना. " ।
इत्युक्त्वा सैकतं नत्वा जगामात्रान्तरे द्रुतम् । प्रविश्य हर्षितो दण्डी तमुवाच कृतानतिः—॥ ४१५ ॥
" कुमार ! परितोषाख्यो लेखवाहोऽयमागतः । पार्श्वात्कमलगुप्तस्य हरिवाहनवार्त्तवित्." ॥ ४१६ ॥
तुष्टोऽथ तं समाहूय, तेन नत्वार्पितं पुरः । लेखमादाय सर्वेषां वाचयामास शृण्वताम्. ॥ ४१७ ॥
पाठावसाने संवृत्य, तमप्राक्षी," दयं कुतः । प्राप्तः ?" इत्यथ सोऽवादीद्—" देव ? वच्मि, निशम्यताम्—॥४१८॥
" कुमारः क्वापि नास्तीति " प्रवृत्तायां जनश्रुतौ, । अतीतेऽहनि मध्याह्ने, क्रन्दत्सु नृपसूनुषु, ॥ ४१९ ॥
प्रसादवित्तके लोके मर्त्तुमुच्चलिते सति, । श्रवःकटुषु 'हा कष्ट' शब्देषु च विशादिषु, ॥ ४२० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सेनाधिपोऽश्रुपूर्णाक्षो निविष्टः स्वगृहाजिरे, ॥ अपश्यदवनौ लेखमकस्मादिममग्रतः ॥ ४२१ ॥
दृष्ट्वा नामाक्षरश्रेणी. कुमारस्यातिविस्मितः । उद्वेष्ट्य राजपुत्राणां पुरः स्वयमवाचयत्, ॥ ४२२ ॥
"स्वस्त्यटव्या महाराजनन्दनो हरिवाहनः । निजे लौहित्यकूलस्थे स्कन्धावारे विजेतरि ॥ ४२३ ॥
कुशली निर्दिशत्येवं युवराजं ससैनिकम्. । अत्रैवावस्थितिः कार्या वासराणि कियन्त्यपि. ॥ ४२४ ॥
तनुर्न क्लेशनीया च मय्यनिष्टविकल्पनात्. । स्मापहारवृत्तान्तः पित्रोः प्राप्यश्च न श्रुतौ." ॥ ४२५ ॥
अथ संवृत्त्य तं लेखं "केनानीतः ?" इति ब्रुवन् । लिखित्वा, प्रतिलेखं च निवेश्य मणिपीठके, ॥ ४२६ ॥
उवाच–"येन केनापि दिव्यलोकाधिवासिना । अयं लेख इहानीतः, प्रतिलेखं नयत्वसौ.', ॥ ४२७ ॥
अथाकस्मात्समुत्तीर्य कश्चिच्चूततरोः शुकः । चञ्चूपुटे तमादाय झगित्युत्पतितो नभः. ॥ ४२८ ॥
सविस्मयश्चमूनाथोऽप्याश्वासनविधित्सया । सलेखं प्रेषयामास मां त्वत्पादयुगान्तिकम्." ॥ ४२९ ॥
युवराजोऽपि सन्तोषदानं दत्त्वा विसृज्य तम् । स्नातो विहितदेवार्चो बुभुजे स परिच्छदः. ॥ ४३० ॥
लेखे धात्वक्षरालोकात् स्वर्णचूर्णावचूर्णिते । ऊहे तेन कुमारस्य दिव्योचितवनस्थितिः. ॥ ४३१ ॥
अथ सङ्कल्पयामास,–" वैताढ्यमनुयाम्यहम् । ग्रामाश्रमपुरारण्योज्झितमार्गो विमार्गयन. ॥ ४३२ ॥
सैन्यं न शक्यते नेतुं मार्गस्य विषमत्वतः, । यियासौ सर्वलोके तु स्तोकान्नेतुमसाम्प्रतम्. ॥ ४३३ ॥
अतोऽनापृष्टसद्बन्धुरसंस्थापितसैनिकः । रात्रौ यात्राविधानेन स्वार्थसिद्धिं करोम्यहम्" ॥ ४३४ ॥
इति सञ्चिन्त्य सञ्जाते निशीथेऽसिलतासखः । सितक्षौमधरो बिभ्रच्चान्दनीं च ललाटिकाम् ॥ ४३५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यञ्जितारब्धसिद्धिश्च स्फुरद्दक्षिणबाहुना । कुबेरवल्लभामाशामूरीकृत्य विनिययौ. ॥ ४३६ ॥ युग्मम्
उद्गते नलिनीबन्धावन्वेषकजिहासया । उत्पथेन पथि गच्छन्नवाप गहनाटवीम्. ॥ ४३७ ॥
ततो गिरिणदीस्नायी, फलाशी, निर्झराम्भसाम् । पायी, गिरिगुहाशायी, समुत्थायी द्विजारवैः ॥ ४३८ ॥
गच्छन्मिश्रवराख्येन कृतातिथ्योऽतिगौरवात् । प्राग्ज्योतिषाधिपभ्रात्रा, पश्यंश्च विविधान्नरान् ॥ ४३९ ॥
क्वचिच्छृङ्खलकग्रीवान् क्वचित्तुरगतुण्डकान् । क्वचिल्लोमविलुप्ताङ्गान् क्वचिदेकांघ्रिचारिण,ः ॥ ४४० ॥
षण्मासान् गमयांचक्रे, समाक्रामन् स उत्तराम् । मन्यमानस्तृणायैव तन्नो शीतातपक्लमम्. ॥ ४४१ ॥
अथैकशृङ्गनामास्ति गिरिर्वैताढ्यसन्निधौ । अष्टापदाभिधं शैलं पश्चिमेन मनोहरः. ॥ ४४२ ॥
तच्छृङ्गवर्त्मना गच्छन् निदाघर्त्तुसमागमे, । ददर्शादृष्टपाराख्यं दृष्टिप्रीतिकरं सरः. ॥ ४४३ ॥
डिण्डीरपिण्डपाण्डिम्ना स्मयमानं तदागमे । नृत्यन्नभस्वदुद्भूतहारिनीरजराजिभिः, ॥ ४४४ ॥
वदत्स्वागतमुल्लासिमरालललनारुतैः, । क्षिपदर्घमरुत्तीरविसारिजलसीकरैः. ॥ ४४५ ॥
तत्रोल्लासिघनानन्दः स्नात्वा तीरभुवि क्षणम् । सुधापानोकहच्छाये विकीर्णनलिनच्छदः ॥ ४४६ ॥
स्वप्ने प्रपौढिमायान्तं पारिजातमहीरुहम् । अपश्यत्कल्पलतया समीहितसमागमम्. ॥ ४४७ ॥
प्रबुद्धश्च, समं सख्या निरचषीत्समागमम् , । अकस्मादथ शुश्राव हयवृन्दस्य ह्रेषितम्. ॥ ४४८ ॥
तज्जिज्ञासां परिज्ञाय प्रस्तुते विघ्नकारिणीम् । विकटैः पदविन्यासैः प्रतस्थे पुनरुत्तराम्. ॥ ४४९ ॥
पाणेः प्रदक्षिणोत्तीर्णैर्मनसा सप्रसत्तिना । स्फुरता दक्षिणाक्ष्णा च विवृद्धगमनोद्यमः. ॥ ४५० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ हारीतदात्यूहचकोरकुलसङ्कुलम्, । केलिकोकिलचक्रालिक्रौञ्चचातकराजितम् ॥ ४५१ ॥
लवङ्गपूगनारङ्गमातुलिङ्गनिरन्तरम्, । तमालवकुलाशोकलकुचैलावनावृतम्, ॥ ४५२ ॥
लीलाकन्दलितध्वान्तं, शैत्यकेलिनिकेतनम्, । आलुलोके वरारामं कस्तूरीतिलकं भूवः. ॥ ४५३ ॥
तदन्तर्दीप्ररत्नौघचीनांशुकमनोरमम्, । अद्राक्षीत्कल्पवृक्षाणां खण्डमाराममण्डनम्. ॥ ४५४ ॥
तस्यापि मध्यभूभागे भासिताशेषदिग्मुखम्, । शोणाश्मकूटसङ्घातैः कृतसन्ध्यासमागमम्, ॥ ४५५ ॥
वैडूर्यपीठबन्धेन तमसो दत्तवैभवम्, । चन्द्रमःकान्तसोपानैश्चन्द्रांशुचयचञ्चुरम्, ॥ ४५६ ॥
स्फुरत्तारावलीरम्यं मुक्तमुक्तावचूलकैः, । हेमप्राकारदीधित्या नित्योदितदिवाकरम्, ॥ ४५७ ॥
'राजराजस्य सर्वस्वव्ययेनापि किमीदृशम् । भवेन्न वेति'लोकानां दत्ततर्कं विलोकनात्, ॥ ४५८ ॥
देवायतनमद्राक्षीन्निर्मानुषममानुषे । भुवने सुलभालोकमनालोकितमन्यदा. ॥ ४५९ ॥
हिरण्यशृङ्खलानद्धवज्रघण्टातिचारुणः । दह्यमानागुरुस्तोमधूमध्याममणियुतः ॥ ४६० ॥
तस्य प्रविश्य मध्ये,ऽथ मणिसिंहासनस्थितम्, । कस्तूरीपङ्कसङ्काशकुन्तलालङ्कृतास्यकम्, ॥ ४६१ ॥
भामण्डलप्रभापुञ्जैर्द्वेधा ज्योसितताम‌सम्, । छत्रत्रयीविनिर्णीतत्रिलोकीप्रभुतोदयम्, ॥ ४६२ ॥
शरण्यं, साकृतिं, शान्तं, तेजसा जितभास्करम्, । अपश्यन्मणिनिर्माणं, श्रीयुगादिजिनाधिपम्. ॥ ४६३ ॥
उद्दामानन्दकन्दोद्यदङ्कुराकारिकण्टकम । सर्वाङ्गमथ बिभ्राणः स्तुतिं कर्तुं प्रचक्रमे. ॥ ४६४ ॥
'श्रीमन्नाभिकुलाकाशप्रकाशनदिवामणे ! । प्रणेतः ! सर्वनीतीनां युगादिपुरुषोत्तम ! ॥ ४६५ ॥



For Private and Personal Use Only

अटाटति भवाटव्यामनन्तकरुणानिधे ! । विधेहि विश्वनाथ ! त्वमनाथे मयि नाथताम् " ॥ ४६६ ॥

[ शुष्कशिखरिणि कल्पशाखीव, निधिरधनग्राम इव, कमलखण्ड इव मारवेऽध्वनि भवभीमारण्य इह वीक्षितोऽसि । मुनिनाथ ! कथमपि दृष्टे भवति नयनसृष्टया सममद्य जन्म जिन ! सफलमभून्मम । अकृतपुण्यमपि सुकृतजनं प्रति लघुमात्मानमवैमि न संप्रति । ]

स्तुत्वा च दक्षिणाशायामध्यास्य मणिजालकम्, । उत्कीर्णां स्फाटिके पट्टे प्रशस्तिं क्षणमैक्षत. ॥ ४६७ ॥
अचिन्तयच्च " नियमादिदं देवविनिर्मितम्, । एतच्च कारितं येन, सरस्तेनैव खानितम्. ॥ ४६८ ॥
अष्टादशलिपि त्यक्त्वा प्रशस्ताप्यक्षरावली । व्यक्तापि नोहितुं शक्या, दृष्टपूर्वेव किन्तु मे. " ॥ ४६९ ॥
इत्यादि चिन्तयन्नेव शुश्राव श्रुतिपेशलम् । हरिवाहननामाङ्कं श्लोकं केनाप्युदीरितम्. ॥ ४७० ॥
अथ विस्मयमापन्नो जगत्यामेव पर्यटन् । आलुलोके मठं दिव्यं रत्नवातायनैर्वृत्तम्. ॥ ४७१ ॥
अपश्यत्तत्र सद्वेषं, सतोषमतिगर्वतः । गन्धर्वकमधीयानं लीलया द्विपदीमिमाम्. ॥ ४७२ ॥
" आकल्पान्तमर्थिकल्पद्रुम ! चन्द्रमरीचिसमरुचिप्रचुरयशोंऽशुभरितविश्वम्भर ! भरतान्वयशिरोमणे ! ॥ ४७३ ॥
जनवन्द्यानवद्यविद्याधर ! विद्याधरमनस्विनीमानसहरिणहरण ! हरिवाहन ! वह धीरोचितां धुरम्. " ॥४७४॥
तेनाथ प्रत्यभिज्ञाय प्रणतः प्रीतचेतसा । मत्तवारणमध्यास्य तमुवाचासमस्थितम्,–॥ ४७५ ॥
" प्रातरेवागमिष्यामी " त्याभाष्य हरिवाहनम् । गतेन किं कृतः क्षेपः सखे गन्धर्वक ! त्वया ? ॥ ४७६ ॥
किं वा तत्र त्वया दृष्टं ? क्वास्ते वा चित्रमायकः ? । कश्चायमचलः ? स्वच्छं केनेदं खानितं सरः ? ॥ ४७७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रासादः कस्य दिव्योऽयं ? मठस्योपरिभूमिकाम् । कोऽधितिष्ठति ? संलप्य येन सार्द्धमिहागतः ” ॥४७८॥
क्षणं विलम्ब्य सोऽवादीदा–“स्तां तावदियं कथा, । उत्तिष्ठ ! भ्रातरं पश्य खेचरालिनुतक्रमम्. ॥ ४७९ ॥
अनुश्रोतासि मद्वृत्तं, देवोऽपि हरिवाहनः । वैताढ्यशिखरे राज्यं प्राप्याद्यैव समाययौ. ॥९८०॥
इत्युक्ते हेलयोत्तीर्य शेषप्रासादवर्त्तिनीः । पद्मरागमहानीलपुष्परागेन्दुकान्तजाः ॥ ४८१ ॥
अश्मगर्भेन्द्रनीलादिघटिताः स्फुटरोचिषः । अजितादिजिनेशानां प्रतिमाः प्रणमन् मुहुः ॥ ४८२ ॥
गन्धर्वकोपदिष्टाध्वा गच्छन्, वृन्दमथावर्ताम् । पश्यन्नचिन्तयत्–“नूनमेषा हेपा मया श्रुता.” ॥४८३॥ विशेषकम्.
अथ गीतस्य झात्कारं, वीणावेणुरवानुगम्, । शुश्राव श्रुतमुद्कर्त्रैमृगर्मीलितदृष्टिभिः. ॥ ४८४ ॥
अनन्तरं च हारीच (?) हरितं कदलीगृहम्, । अपश्यदङ्गणासीनभूरिभूपपरिच्छदम्. ॥ ४८५ ॥
अद्राक्षीदस्य मध्ये च निविष्टं हरिवाहनम् । सलीलं वारनारीभिरुद्धूतसितचामरम्. ॥ ४८६ ॥
खिद्यत्सखीजनोत्सङ्गनिःसहक्षिप्तदेहया । तल्पे कमलपत्राणां चन्दनार्द्रे शयानया. ॥ ४८७ ॥
देहोत्तापातिरेकेण शुष्कचन्दनपङ्कया । नवीनवयसा पार्श्वेऽलङ्कृतं नृपकन्यया ॥४८८॥ युग्मम्
प्रीत्या गन्धर्वकेणाथ निवेदिततदागमः । हरिवाहन उत्तस्थावासनात्, तं ददर्श च. ॥ ४८९ ॥
मृदुवल्कलसंवीतं, वल्लीनद्धोर्ध्वमूर्द्धजम्, । वातोद्धूतलतापुष्परेणुधूसरविग्रहम् ॥ ४९० ॥
धैर्यावष्टम्भसौहार्दपौरुष्यादिगुणावलीम् । द्रष्टुं समुदितां धात्रा कौतुकादिव निर्मितम्, ॥ ४९१ ॥
अथानन्दाश्रुबिन्दूनां सन्दोहैरर्थकल्पनम् । कुर्वन्मुक्तामयं सद्यः प्रत्युद्गम्य प्रमोदतः ॥ ४९२ ॥



For Private and Personal Use Only

नमन्तमवनीचुम्बिशिरसोत्क्षिप्य सादरम् , । आलिङ्गय विष्टरस्यार्द्धे समक्षिप्य न्यवेशयत् ॥ ४९३ ॥
राजपुत्रीमवादीच्च–" देवि ! सिंहलशासितुः । चन्द्रकेतोर्महीभर्तुः सूनुर्वीरवराग्रणीः, ॥ ४९४ ॥
वरो मलयसुन्दर्यास्त्वत्स्वसुः स्वेच्छया वृतः, । स एष समरकेतुर्दुःखित्वं यं विना मम. " ॥ ४९५ ॥
इत्युक्ते युवराजस्तामनंसीत्, सापि चक्षुषा । ससम्भ्रममपश्यत्तं चिरं निश्चलपक्ष्मणा. ॥ ४९६ ॥
अत्रान्तरे प्रतीहारी तां प्रविश्य व्यजिज्ञपत्–। " श्रुत्वाऽत्र जीवितत्यागं देव्या श्रीपत्रलेखया ॥ ४९७
प्रहितः कञ्चुकी द्वारे तिष्ठतीति "ततश्च सा । निर्यातोत्तरमप्राप्य, कोऽप्यथार्यामिमां जगौ, ॥४९८॥
" तव राजहंस ! हंसीदर्शनमुदितस्य विस्मृतो नूनम् । सरसिजवनप्रवेशः समयेऽपि, विलम्बसे येन. ॥४९९॥"
श्रुत्वोवाच कुमारस्तां "देवि ! विद्याधरे पुरे । प्रवेशलग्नमाचष्टे विराधोऽयं ममाधुना ॥ ५०० ॥
तदादिशाहं गच्छामि, त्वं च देवीं विलोकय. " । इत्युक्त्वा विष्टरात्सुतजयध्वानैः सहोत्थितः ॥५०१॥
आरुह्य करिणीपृष्ठं समं समरकेतुना, । व्योम्नि तालीवनं कुर्वन वातोत्ताण्डवितध्वजैः, ॥५०२॥
सेनया व्योमयायिन्या निर्घोषमपरेण च । दिक्पालानामकुर्वाणः कर्णाक्षिपुटपीडनम्, ॥५०३॥
शिखण्डिकोकिलप्रायपतत्रिकुलसङ्कुलाम् । कस्तूरिकामृगप्रायश्वापदापादितश्रियम् , ॥५०४॥
किन्नरप्रायसङ्क्रीडद्वनेचरविराजिताम्, । चन्द्रकान्तविनिष्यन्दप्रायनिर्झरवाहिनीम् , ॥५०५॥
गल्वर्कोद्दीर्णसम्प्राचिंप्रायदावानलोद्गमाम् , । कान्तारदेवताश्वासपवनप्रायमारुताम् , ॥५०६॥
स्फटिकप्रायपाषाणां, सैकतप्रायभूतलाम् , । अन्तरालाटवीं पश्यन्वैताढ्यस्यैकशृङ्गतः ॥५०७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पट्टांशुकध्वजाजालविराजितनिकेतनम् । आससादोत्तरश्रेणौ पुरं गगनवल्लभम्. ॥५०८॥
चन्द्रशालां समारुह्य पौरनारीभिरर्चितः । कटाक्षकुसुमक्षेपैः प्राप राजनिकेतनम् ॥ ५०९ ॥
तत्र विद्याधरैर्वृन्दैर्विहिताशेषमङ्गलः । सन्मान्य नागरं लोकं, ययौ भोजनमण्डपम्. ॥ ५१० ॥
स्नातो, भुक्तः, सताम्बूलः, कृतसान्ध्यो यथाक्रियम् , । स्थित्वा सभायां, वेलायां सम्प्राप चित्रशालिकाम्. ॥५११॥
सिंहलेन्द्रसुतात्पृष्टवृत्तान्तः शयितः क्षणम् , । चारणोच्चारितं प्रातरिमं श्लोकमशुश्रुवत् , ॥५१२ ॥
" देव ! प्रद्योतनः प्राप त्वत्प्रताप इवोदयम् , त्वद्द्विषामिव घूकानां बभूवान्धा जगत्त्रयी. ॥ ५१३ ॥
श्रुत्वा च तं समुत्थाय सहसेनापरिच्छदः । वेताढ्यमारुरोहास्य वीक्षितुं रामणीयकम्. ॥ ५१४ ॥
अम्भोदध्वानगम्भीरध्वनिना गिरिकेकिनः । नर्त्तयन्नपठच्छ्लोकमथामुं कोऽपि मागधः ॥ ५१५ ॥
" किमस्य भूभृतो देव ! दृश्यं तुल्यान्यभूभृतः । त्वमेवातुल्यमहिमा दृश्यो मध्ये महीभृताम् ॥ ५१६ ॥ "
तच्छ्रुत्वोवाच सानन्दं सिंहलाधिपनन्दनः । " कुमार ! साध्वनेनोक्तं भुवि वर्ण्यस्त्वमेव हि. ॥५१७॥
यतो भुजासहायेन मितैरेव दिनैस्त्वया । प्रापितं खेचरानीकं विद्यादेव्यश्च वश्यताम् ? ॥ ५१८ ॥
तदाचक्ष्व–'तदा तस्माल्लौहित्यगिरिकाननात् । क्व दुष्टकरिणा तेन हृत्वा नीतः ? कथं स्थितः ? ॥५१९॥
लेखो दत्तः कुतः स्थानात् ? किं दृष्टं ? सम्पदः कथम् ? । जिनालयवने दृष्टा का वा सा राजकन्यका?"६२०युग्मम्.
इति पृष्टो विहस्याथ जगाद हरिवाहनः. । " युवराज ! वदाम्येषः, शृणु, चेदस्ति कौतुकम्–॥ ५२१ ॥
स पश्यतस्तवाकस्मात् मयारूढो तदा करी । किञ्चिद् गत्वाग्रतो वेगादुत्पपात नभस्तलम्. ॥ ५२२ ॥



For Private and Personal Use Only

तस्यातिरंहसा चाहं गण्डशैलसमाचलाम् । दूर्वानिभमहारामां नद्वैलोपमसागराम् ॥ ५२३ ॥
निर्मोकप्रायगङ्गादिमहासिन्धुं वसुन्धराम् । पश्यन्नैकटयतः क्वापि ताप्यमानोऽर्करश्मिभिः ॥ ५२४ ॥
वितीर्णमांसलच्छायः क्वचिदम्भोदमण्डलैः । क्वचित्सिद्धाध्वगद्वन्द्वैर्दत्ताध्वा करिसाध्वसात् ॥ ५२५ ॥
एकशृङ्गगिरेः शृङ्गनभोभागे व्यचिन्तयम् । "केनाप्यधिष्ठितो नूनमेष दैत्यादिना करी. ॥ ५२६ ॥
व्यावर्त्तयामि तदिमं यावद्याति न दूरतः" । इति ध्यात्वाऽक्षिपं पाणिं दक्षिणं क्षुरिकां प्रति. ॥ ५२७ ॥
दृष्ट्वा च तां समुत्खातां तडित्तरलरोचिषम्, । सरस्यदृष्टपाराख्ये स पपातार्त्तनादवान. ॥ ५२८ ॥
तत्क्षणाच्च तिरोभूतस्तीर्त्वा स्नातोऽहमप्यथ । क्षणं विश्रम्य तत्तीरे, ध्यायन् संसारचित्रताम् ॥ ५२९ ॥
निराशो निजदेशाप्तावाश्रमादि निरीक्षितुम् । उरीकृत्य दिशामेकामचलं मन्थरक्रमैः ॥ ५३० ॥
पदश्रेणीरथापश्यं सैकते ललिताकृतीः । सलक्षणां पदश्रेणीं तासु चैकामनुव्रजन् ॥ ५३१ ॥
अद्राक्षं बहलामोदमेकमेलालतागृहम् । उल्लासिपल्लवव्यूहः कृतसन्ध्यासमागमम्. ॥ ५३२ ॥
कृतस्थितिश्च तद्द्वारि झगित्यन्तर्व्यलोकयम् । हृतहेमरसच्छायं प्रभापटलसङ्गमम्. ॥ ५३३ ॥
वन्यौषधिप्रभाशङ्की चक्षुषी तत्र चाक्षिपम् । पुष्पावचायिनीमेकामपश्यमथ बालिकाम् ॥ ५३४ ॥
चन्द्रपङ्कजपीयूषरम्भाद्या वस्तुजातयः । विलोक्य वेधसा शङ्के बहुशस्तां विनिर्मिताम् ॥ ५३५ ॥
मदीयलोचनापातजातसर्वाङ्गवेपथुम् । तामवोचं-" शुभे का त्वं ? किमेका निर्जने वने ? ॥ ५३६ ॥
मा भैरहं न दैत्यादिर्भवन्तीं हर्त्तुमागतः, । तनयो दिगन्तख्यातेर्मेघवाहनभूभुजः ॥ ५३७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हरिवाहननामाहं, वशीकृत्य गजं निजम् । आरुह्य छद्मरूपेण हृतः केनापि वैरिणा, ॥ ५३८ ॥
शस्त्रिकादर्शनोत्त्रासान्निक्षिप्तश्च सरोवरे, । पदमुद्रानुमानेन भुवमेतां समागतः. ॥ ५३९ ॥ विशेषकम्
जातलोचनसाफल्यस्त्वां पृच्छामि, वदाधुना । कोऽयं देशो ? गिरिः को वा ? किं सरः ? कोऽत्र भूपतिः ?" ॥५४०॥
अथानतमुखी स्थित्वा मुहूर्त्तमकृतोत्तरा, । दत्तमार्गा मया स्तोकं स्पृशन्ती वामतस्तनुम् , ॥ ५४१ ॥
सकालकूटपीयूषच्छटां कुटिलवीक्षितैः । मोहाह्लादकरैः क्षिप्त्वा मयि, द्रागेव निर्गता. ॥ ५४२ ॥ युग्मम्
"लोकाचारानभिज्ञत्वाद् वाङ्मात्रेणापि हीनया । किमेतयेति" सञ्चिन्त्य प्रस्थितोऽहमचिन्तयम् ॥ ५४३ ॥
"इदं वनमियं कन्याऽदृष्टपारमिदं सरः । अहो चित्रपटालेख्यसंवादं सर्वमश्नुते." ॥ ५४४ ॥
इति सञ्चिन्त्य तां द्रष्टुं प्रतीपमगमं पुनः । अन्विष्याऽप्राप्तद्वार्त्तो दिनशेषे सरोऽव्रजम्. ॥ ५४५ ॥
प्रक्षाल्य चरणौ, स्मृत्वा देवतां, स्वादुकन्दलान् । मृणालिन्याः समास्वाद्य सुधारसमयं पयः, ॥ ५४६ ॥
तस्यैव रक्ताशोकस्य प्रियारपृष्टस्य सन्निधौ । विधाय पल्लवैस्तल्पमल्पनिद्रोऽस्वपं निशि. ॥ ५४७ ॥ युग्मम्
तामन्वेष्टुं पुनः प्रातर्भ्रान्त्वा सकलकाननम्, । निःप्रत्याशः समारुह्य तटमेकं व्यलोकयम्. ॥ ५४८ ॥
अथोत्तरे सरस्तीरे पक्षिक्षोभकुतूहलात् । गत्वा, दृष्ट्वा च तत्रार्द्राः पदश्रेणीर्विनिगतीः ॥ ५४९ ॥
ताभिर्गच्छन् पुरोऽपश्यं प्रासादं पद्मरागजम् । गन्धर्वकानुयातेन दृष्टोऽहं यद्वने त्वया ॥ ५५० ॥ युग्मम्
तत्र देवं नमस्कृत्य निविष्टो मत्तवारणे, । अपश्यं लोललावण्यामेकां तापसकन्यकाम् , ॥ ५५१ ॥
सद्यः कृताभिषेकस्य पूजितस्य नवाम्बुजैः । पुरो नाभेयनाथस्य निबद्धकमलासनाम् , ॥ ५५२ ॥



For Private and Personal Use Only

दिव्यवल्कलसंवीतां, किञ्चित्मुकुलितेक्षणाम् , दधानां दक्षिणे पाणौ स्थूलमुक्ताक्षमालिकाम्. ॥ ५५३ ॥ युग्मम्
अथासौ जपविध्यन्ते परिचारिकया युता । जगतीप्रतिमापूजां कृत्वाऽऽयाता पुरो मम. ॥ ५५४ ॥
कृत स्वागतमाचख्यौ–" पवित्रय ममाश्रमम् " । तथेत्यभिहितोऽगच्छमथाहमपि तन्मठम् ॥ ५५५ ॥
आतिथ्यान्ते सुखासीनः पृष्टो वृत्तान्तमब्रुवम् , । अत्रान्तरे नभोमध्यमारुरोह नभोमणिः. ॥ ५५६ ॥
कृत्वा मध्यान्हकृत्यं सा मयि पूजितदेवते । उपनीतवती स्वादुसुरशाखिफलोत्करम्. ॥ ५५७ ॥
भुक्त्वा चान्ते स्वयं कृत्वा वृत्तिं मूलफलादिभिः, । ममान्तिकं समागत्य दकारासनसङ्ग्रहम् ॥ ५५८ ॥
उक्ता मया क्षणं स्थित्वा–" तावकीयं सुशीलता । विदधाति महाभागे ! ममाकस्मिकचापलम्. ॥ ५५९ ॥
वद, कस्तव सद्वंशः ? कानि नामाक्षराणि वा ? वैखानसव्रतं किं वा ? विद्वेषो विषयेषु किं ? " ॥ ५६० ॥
इत्युक्ते सहसा तस्यास्तरुणार्ककराहता । ताराश्रेणिरिव प्राच्याः पपाताश्रुकणावलिः. ॥ ५६१ ॥
मयाऽथ सविषादेन समाश्वास्यार्पितैर्जलैः । प्रक्षाल्य वदनं, स्थित्वा, सा वक्तुमुपचक्रमे. ॥ ५६१ ॥
" यद्यपि प्रागवस्था मे श्रुता दुःखौघदायिनी, । कथयामि तथापीमां शृणु कौतुकिनस्तव.–॥ ५६२ ॥
अस्तीह मेदिनीपीठे पुरी काञ्चीति विश्रुता, । चापाचार्यपदं चक्रे पञ्चेषोर्यद्वधूजनः. ॥ ५६३ ॥
रिपुस्त्रीरम्यसीमन्तसिन्दूरस्य समीरणः । तस्यां विश्वत्रयीख्यातो राजा कुसुमशेखरः. ॥ ५६४ ॥
देवी गन्धर्वदत्तेति तस्यान्तःपुरिकोत्तमा. । तदात्मजाहमेकैव स्वजनोद्वेगकारिणी. ॥ ५६५ ॥
ज्ञानिना वसुरातेन मदुत्पत्तौ निवेदितम्,–। ' एषा सम्पत्स्यते कामं कन्यका पुण्यभागिनी. ॥ ५६६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परिणेष्यति यश्चैनमाधिपत्यमसौ क्षितेः । चक्रिणा निहितात्मीयराज्यभारः करिष्यति '. ॥ ५६७ ॥
कृत्वा जन्मोत्सवं ताताेऽप्युवाच दशमेऽहनि । भाषयध्वमिमां पुत्रीं नाम्ना मलयासुन्दरी. ॥ ५६८ ॥
क्रमोपचीयमानाथ स्वीकृताशेषसत्कला । लीलोपदेशनाचार्यमवापं नवयौवनम्. ॥ ५६९ ॥
प्रसुप्ता चन्द्रशालायामेकदा च निशामुखे । दिव्यतूर्यनिनादेन निद्रात्यागमहं व्यधाम्. ॥ ५७० ॥
अपश्यं च मणिग्रावनिर्मितेर्जिनवेश्मनः । कोणैकदेश आत्मानं नृपकन्याभिरावृतम्. ॥ ५७१ ॥
तासु काचिद्विषादस्था, काचित्कौतुकचञ्चला, । काचिद्वातायनासीना, काचिदूर्ध्वकृतस्थितिः, ॥ ५७२ ॥
सक्षोभा च क्षणं स्थित्वा विहाय सहजं भयम्, । तत्रार्द्धजरतीमेकामपृच्छं विनयानता. ॥ ५७३ ॥
“ आर्ये ! कः सन्निवेशोऽयं ? के एते रुचिरा नराः ? । कोऽयं मेरुरिवाद्रीणामेषां मध्ये महीपतिः ? ” ॥ ५७४ ॥
सोवाच–“वत्से ! द्वीपोऽयं ‘पञ्चशैल’ इति श्रुतः । वैताढ्यखेचरा एते, पतिरेषामयं पुनः ॥ ५७५ ॥
विचित्रवीर्यनामेति.” तयोक्ते, सहसागतः । दण्डी पवनगत्याख्यः, खेचरेशं व्यजिज्ञपत्.–॥ ५७६ ॥
“देवात्र दीयतां दृष्टिः, कुशस्थलपतेरियम् । पुत्री प्रतापशीलस्य गौराङ्गी कुसुमावली. ॥ ५७७ ॥
इयं च चम्पकच्छाया पुरो मलयसुन्दरी । यादवोऽस्याः पिता काञ्चीनृपः कुसुमशेखरः. ॥ ५७८ ॥
एषात्र मगधेशस्य महाबलमहीपतेः । सुतास्ते बन्धुमत्याख्या श्यामाङ्गी मत्तवारणे. ॥ ५७९ ॥
एताश्च स्फाटिकीं वेदीमारूढा सरलत्विषः । पुत्र्यः कलिङ्गवङ्गकुलूतादिमहीभुजाम्. ॥ ५८० ॥
लीलावतीन्दुलेखाऽथ कामलेखा च मालती, । इत्यादिनामभिः ख्यातिं गता देशान्तरेष्वपि. ” ॥ ५८१ ॥



For Private and Personal Use Only

अथ ताः स्मेरदृग् दृष्ट्वा निकटस्थां विलासिनीम् । आदिक्षच्चित्रलेखाख्यां राजा तन्मण्डनं प्रति. ॥ ५८२ ॥
निर्वर्त्तिते तया तत्र क्षीरोदाद्याहृतैर्जलैः । स्नात्रं मणिमयैः कुम्भैश्चक्रे विश्वत्रयीपतेः. ॥ ५८३ ॥
दध्वनुर्मन्द्रवाद्यानि वेणुर्वीणाः सहस्रशः, । जगुर्मधुरगायन्यो, ननृतुर्नृपकन्यकाः ॥ ५८४ ॥
नर्त्तित्वा चित्रलेखां तां गच्छन्तीं खेचराधिपः । निजासनैकदेशे मां समाहूय न्यवेशयत्. ॥ ५८५ ॥
उन्नमय्याथ चिबुकं, बभाषे कलया गिरा,– " विचित्रस्यास्य नाट्यस्य कुतो वत्से ! तवागमः ? " ॥ ५८६ ॥
त्रपानतमुखी मन्दं प्रोवा चाहं–" पितर्मम । नैको गुरुर्विशेषस्तु शिक्षिता मातुरन्तिके. " ॥ ५८७ ॥
" वत्से ! तया कुतो ज्ञाता ? " "तात ! खेचरलोकतः" । "वत्से ! केनाभिधानेन प्रसिद्धा जननी तव ?"॥५८८॥
"तात ! गन्धर्वदत्तेति." तच्छ्रुत्वा सचिवोऽब्रवीत् । वीर्यमित्राभिधो–"देव ! न सा देवस्य पुत्रिका. " ॥ ५८९ ॥
अथावोचन्नृपो–"वत्से ! मानवर्णवयोगुणैः । कीदृक् सा ?" "तात ! मानेन नातिह्रस्वा न चायता. ॥ ५९० ॥
अनुकारस्तु देवस्य किञ्चिन्नान्यस्य कस्यचित्." । " वत्से ! को जनकस्तस्याः ? " "कश्चिद्वैखानसः पितः ॥५९१॥
"वत्से ! स किं त्वया दृष्टः ?" "तात ! लोकाच्छ्रुतो मया" । "किं ब्रूते वा न किञ्चित्सा ?""पृष्टा रोदिति केवलम्"
तेनाथ सचिवः पृष्टः–"सा कस्मादार्य ! रोदिति ?"। 'सोऽभ्यधाद्–"देव ! तदज्ञातौ विपत्तिः कापि कारणम्."५९३॥
'वत्से ! न किमपि ब्रूते यदि सा, तत्कथं त्वया । ज्ञातं–विद्याधरे लोके तस्या नाट्यागमोऽजनि ? " ॥ ५९४ ॥
" तात ! विज्ञापयाम्यस्मात्समतिक्रान्तवत्सरे । मुनिर्महायशा नाम काञ्च्यामयाद्बहुव्रती ॥ ५९५ ॥
बाह्योद्याननिविष्टं च तं द्रष्टुं मत्पिता गतः, । सर्वे च नागरा लोका जननी च मया सह. ॥ ५९६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तया प्रणम्य प्रस्तावे पृष्टं–'विद्याधरान्वये । भगवन्नहमुत्पन्ना. जाते च पुरविप्लवे ॥ ५९७ ॥
वियुक्तास्मि सर्वैराप्तैरद्यापि न सङ्गमः. । अत आदिश तैर्योगो भविष्यति न वा मम ? " ॥ ५९८ ॥
"वत्से ! ततः किमाचख्यावसौ ?" "तातेदमुक्तवान्–। 'भविष्यत्यचिरादेव' पुनः पृष्टं–'कदा मुने ! ?' ॥५९९॥
क्षणं ध्यात्वा क्षिप्तस्मेरचक्षुरथादिशत्– । 'कल्याणि ! तव पुत्रीयं यदा'–इत्यादि किमप्यसौ " ॥ ६०० ॥
"आर्य ! किं स्यात्तदादिष्ट" इत्युक्तः सचिवोऽभ्यधात्स–"देव! आदिष्टो विवाहेऽस्या नूनं त्वद्बन्धुसङ्गमः"॥६०१॥
"वत्से ! कस्मान्न पृष्टोऽसौ'अज्ञाते कथमागमः ? "। "पृष्टः;उक्तं च तात !–' ते स्वयमेवावभोत्स्यन्ते ॥ ६०२ ॥
नीत्वा त्वया सहैनां च स्वकीयं च निकेतनम्, । अस्याः समुचितं कृत्यं सर्वमेव करिष्यन्ति," ॥ ६०३ ॥
अथ मन्त्री समाचष्टे–"देवेदं ज्ञातमेव हि । सन्देहश्चेत्तदानाय्य तामेव कुरु निर्णयम्. " ॥ ६०४ ॥
" आर्य ! नैवं, परस्त्रीणां यतो निन्द्यं विलोकनम्. । चित्रलेखा निराकर्त्री भ्रान्तिमेषैव तत्सखी." ॥ ६०५ ॥
प्रातःशङ्खोऽथ दध्वान, विसृज्य खेचरप्रभून् । सोऽपि विद्याधराधीश आदिदेश निजं नरम् ॥ ६०७ ॥
"अस्याः पवनवेग ! त्वं पुत्र्याः काञ्चीपतेरिह । कृत्वा, गौरवमत्रत्यं सर्वं दर्शय कौतुकम् ॥ ६०७ ॥
सहैताभिश्च कन्याभिर्यथास्थानमिमां नयेः " । इत्यादिश्य विमानस्थो जगाम सह खेचरैः. ॥ ६०८ ॥
तन्नियुक्तनरोद्दिष्टरम्योद्देशविलोकनम् । कुर्वाणाऽहमपि प्राप तत्राकस्मिकविस्मयम्. ॥ ६०९ ॥
दृष्टं तु, कृतसेवं तु, कारितं तु स्वयं पुरा । तदायतनमालोक्य प्राविशं गर्भमन्दिरम्. ॥ ६१० ॥
तत्र दीपप्रभालोकं निरस्यन्तमभीशुभिः । हरिचन्दनलिप्ताङ्गं सुरद्रुस्रग्भिरर्चितम् ॥ ६११ ॥



For Private and Personal Use Only

अपश्चिमं जिनाधीशं वज्ररत्नशिलामयम् । श्रीमहावीरनामानमपश्यं शान्तदर्शनम्. ॥ ६१२ ॥
पितृकल्पं तमालोक्य पूर्वाभीष्टस्य कस्यचित् । स्मरन्तीव घनोत्कण्ठाऽकरवं पुरतः स्तवम्. ॥ ६१३ ॥
आनन्दशोकसम्मिश्रस्वसंवेद्यं दशान्तरं । अनुभूय, सखीवाक्यादथागां द्रष्टुमर्णवम्. ॥ ६१४ ॥
आरुह्य दक्षिणां भित्तिं प्राकारस्य महोर्मिभिः । आस्फालिते तले तस्य स्फाटिके चक्षुरक्षिपम्. ॥ ६१५ ॥
अद्राक्षं तत्र नौसंस्थमेकं नृपकुमारकम् । उदन्वसौहृदायातमिन्दुर्देवपथादिव ॥ ६१६ ॥
दक्षैस्त्रिचतुरैरेव सहितं परिचारकैः । निद्राक्रान्तैः समन्वीतं कियद्भिः कर्णधारकैः ॥ ६१७ ॥
दृष्टा चाऽचिन्तयं नूनं–"रूपगर्वेण खर्वितः । अनेन पुष्पधन्वापि बद्धो वामे निजक्रमे ॥ ६१८ ॥
अथेर्ष्यया निजं रूपमाविष्कर्तुमिव स्मरः । गृहीतसारश्रृङ्गारो विवेश हृदयं मम. ॥ ६१९ ॥
स्तिमितैस्तरलैर्मुग्धैः प्रगल्भैः कुटिलक्रमैः । सरलैः पटुभिर्जिह्मैरीक्षणैस्तं व्यलोकयम्. ॥ ६३० ॥
सप्रार्थनां सवैदग्ध्यां सानुरागां सविभ्रमाम् । सात्मार्पणां सवैधुर्यां दृष्टिं सोऽपि मयि न्यधात्. ॥ ६२१ ॥
तद्भुवाथ कृतादेश एकः कैवर्त्तको युवा । मां प्रणम्य सविश्वासमवोचच्चतुरं वचः,–॥ ६३२ ॥
"देवि ! सिंहलनाथस्य चन्द्रकेतोस्तनूद्भवः । नाम्नायं समरकेतुरिहायातः प्रसङ्गतः, ॥ ६२३ ॥
दुष्प्रवेशमपुण्यानां त्वच्चेत इव वीक्षितुम् । वाञ्छत्येष इदं चैत्यं तदादेशय पद्धतिम्. ॥ ६२४ ॥
वेश्या वसन्तसेनाख्यामवन्तिनृपसम्मताम् । " सखि ! ब्रूहि यथावृत्तमस्ये"त्यहमथावदम्. ॥ ६२५ ॥
साऽवोचद्"भद्र ! केनापि रात्रावद्यैव नायिका । आनीता नस्तथैषोऽपि सर्वो भूपसुताजनः. ॥ ६२६ ॥

इदमद्भुतसौन्दर्यं कुमारस्यास्य रूपवत् । अपूर्वं चैत्यमेतस्याः, कथं मार्गं वदत्यसौ ? " ॥ ६२७ ॥
अत्रान्तरे क्षणं स्थित्वा कर्णधारस्तमब्रवीत् । "दृष्टं द्रष्टव्यमेतत्तर्हि गम्यते शिबिरं प्रति." ॥ ६२८ ॥
स तु मत्सन्निधित्यागमचिकीर्षन्पुनः पुनः । तेनोक्तोऽब्रोचद्, "अस्वास्थ्यं सखे ! बाढं तनौ मम, ॥६२९॥
प्रतीक्षस्व क्षणमत्रैव कर्पूरप्रायपादपे, । किन्तु प्रमाणभूस्त्वं मे " सोऽथ भूयोऽप्यभाषत, ॥ ६३० ॥
"यद्येवं गम्यतां शीघ्रमस्य शीतोपचारतः । सन्निपातज्वरस्येव व्याधेः सन्तर्पणं परम् " ॥ ६३१ ॥
इत्युक्त्वाऽचालयत्तस्थानादहमप्यवदं पुनः—। "वसन्तसेने ! यत्किञ्चिदुक्तेन संनिवर्त्तय. ॥ ६३२ ॥
अदृष्टदेव एवास्मिन् याते मलिनता मम । पृष्ट्वा किञ्चिदिह द्वारं करोम्यस्य समीहितम्." ॥ ६३३ ॥
स तयोचे—"अम्बुधेः क्षोभो, न स्वास्थ्यं च विभोस्तव, । तन्निवर्त्तय नावं स्वां, स्तुत्यैनां च प्रसादय; ॥६३४॥
यद्-गोत्रदेवतेयं ते" तच्छ्रुत्वा सोऽपि नाविकः । "यदादेशं" वदन्सद्यश्चक्रे नौविनिवर्त्तनम्. ॥ ६३५ ॥
अवादीच्च निजां नावं—"देवि ! त्वं सगुणा, स्थिरा, । बहुक्षमा, सुकर्णा च, गम्भीरा, पात्रमुत्तमम्, ॥६३६॥
उत्तालचलनोद्धुञ्जनमञ्जीरे भूरिविभ्रमैः । विलम्बैश्चलनैर्नीतोऽस्वास्थ्यं मम विभुस्त्वया, ॥ ६३७ ॥
तस्मान्मीनध्वजेनेममुच्चापेन समाकुलं । निर्मुक्ततारका त्रातुं त्वमेव सुतनु ! क्षमा, ॥ ६३८ ॥
अमुं त्यजन्ती लघुतामचैतन्याकुलीनते । वक्रतामूर्ध्वमुखतामात्मीयां ज्ञापयिष्यसि, ॥ ६३९ ॥
जराजर्जरदन्तस्य कस्यापि प्रान्तभूभृतः । अङ्कं यास्यसि दुर्वातैर्वृद्धैर्गुरुभिरीरिता, ॥ ६४० ॥
इच्छा चेत्स्वर्णपट्टेऽस्ति द्विधाभावं विधेहि मा । परिच्छदयुता तूर्णं यात्रायामुन्मुखीभव" ॥ ६४१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्त्वा तं बलादेव प्रणामं मय्यकारयत्, । सोऽवादीत्–"प्रणतिं कस्यास्त्वयाहं मूर्ख ! कारितः ? ॥६४२॥
इयत्प्रसादिता का वा ?" नाविकः पुनरब्रवीत् । "कुमार ! दोषवान्नाहं, साक्षाद्देवी प्रसादनात्" ॥६४३॥
अथाचिन्तयमुद्भूतवैलक्ष्या विफलानना–"सिन्धौ यदि पतत्येष तदा मे पातकं महत्, ॥ ६४४ ॥
तस्मात् स्वयंवरो युक्तः." चिन्तयन्त्यामिदं मयि, । विलेपनपटं बिभ्रन्पुष्पभाजनसंयुतम्, ॥ ६४५ ॥
निर्गत्य राजपुरुषः सभृत्यो जैनमन्दिरात् । मामुवाच–"गृहाणेमां शेषां मलयसुन्दरि !" ॥ ५४६ ॥
भृत्योऽपि मां पुरोभूय "काञ्चीमध्यमणिस्तव । नृत्यन्त्याश्च्युतः, इत्येनमुररीकुर्वि"त्यभाषत. ॥६४७॥
अभीक्ष्णं भाषमाणं तमवोचं–"भद्र ! किं मया । न श्रुतं ? भाषसे येन भूयो भूयः तदेव हि ? ॥६४८॥
मयाङ्गीकृत एवायं नायकः, किन्तु तिष्ठतु । अहं यावदिहस्थाने, स्वस्थानं तु गता सती ॥ ६४९ ॥
काञ्चीमध्यं समायातं गृहीष्यामि," ततः स्रजम् । समुद्रपूजनव्याजादेकां नृपसुतेऽक्षिपम्. ॥६५०॥
द्रवं च चान्दनं क्षिप्त्वा व्यधां स्वस्यापि शेखरम्. । सोऽपि कण्ठे स्रजं कृत्वा तारकं नर्मणाऽब्रवीत्–॥६५१॥
"किमीक्षसे ? न देयोऽस्या लेशोऽपि हि मया स्रजः, । इच्छसि चेत्तदा भङ्ग्या कयाऽप्यन्यां विमार्गय," ॥६५२॥
सदुःखमभ्यधात्सोऽपि–"किं याचे ? सपरिच्छदा । तव प्रणयिनी नीता कैश्चिन्मायातिरोहितैः" ॥६५३॥
तच्छ्रुत्वा–"किमिदं नर्म ? सत्यं वा ? मां न पश्यति ?" इत्थं वितर्क्य पश्यन्ती नाद्राक्षं राजकन्यकाः. ॥६५४॥
अत्रान्तरे कुमारोऽपि वप्रमालोक्य निर्जनम्, । विषण्णोऽप्यावृताकारः कर्णधारमभाषत–॥ ६५५ ॥
"सखे ! मारम विषीदस्त्वं, कृतं स्नेहोचितं त्वया, । मन्दभाग्यैरपारतोऽयं कन्यारत्नसमागमः. ॥ ६५६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तदतित्वरया गत्वा, स्वदेशं प्रति सज्जय । दृढवर्मचमूनाथं, तातस्यार्पय मद्धनम्, ॥ ६५७ ॥
मातुर्माणिक्यमुक्तादि, पुस्तकानि विपश्चिताम्, । पवित्रभूमावत्रैव देहत्यागं करोम्यहम्. " ॥ ६५८ ॥
अथ हाहारवं तत्र विदधत्येव नाविके, । तेनात्मा जलधौ क्षिप्तो लोलकल्लोलमालिनि. ॥ ६५९ ॥
पतितं तं समालोक्य, सद्यस्तत्सङ्गमेच्छया । प्राकारशिखराज्झम्पामहमप्यग्बुधावदाम्. ॥ ६६० ॥
अथ सायं समारूढप्रसादशिखरस्थिताम् । शय्यामधिशयानां स्वामद्राक्षं, जातविस्मया ॥ ६६१ ॥
श्रीखण्डतिलकस्पर्शादपास्तस्वप्नविभ्रमा । स्थित्वा विष्टरमध्यास्य ध्यायन्ती तं नृपात्मजम्, ॥ ६६२ ॥
प्रविश्य सप्रणामाथ सखी मां बन्धुसुन्दरी । अवादीद्, "अद्य दिव्योऽयं तवाकल्पः कुतः सखि ! ॥६६३ ॥
कथं वा जृम्भिकारम्भः ? कस्माद्वा लोहिते दृशौ । कुतस्तल्पे न दृष्टा च प्रथमायातया मया ? " ॥ ६६४ ॥
"अहं तु मा विधा स्वप्नेऽप्यभिप्रायमिमं सखि ! " । इत्युक्त्वा शर्वरीवृत्तं सर्वं तस्यै न्यवेदयम्. ॥ ६६५ ॥
निशम्य निर्वृतस्वान्ता साऽपि स्थित्वा ययौ गृहम् । अहं च विस्मयस्मेरा व्यमृशं निजचेतसि. ॥ ६६६ ॥
"तिलकस्यानुभावोऽयं चन्दनस्य, यदेतया । नाहं दृष्टा, तदा तैश्च; हृत्वा नीतेति निश्चिता. ॥ ६६७ ॥
तदोक्तं तेन ' वन्दस्व एनन्मलयसुन्दरि ! । दृग्हारि हरिचन्दनम् '................ ॥ ६६८ ॥
पुनरागतया दृष्टा, प्रमृष्टे च विशेषके । " विकल्पोत्थमनैषं तद्दिनं भूषादिना विना. ॥ ६६९ ॥
अन्येद्युर्मामतिम्लानां बभाषे बन्धुसुन्दरी,– । " मा विषीदः, ध्रुवं भावी सखि ! तत्सङ्गमस्तव. ॥ ६७० ॥
वसुरातवचो व्यर्थं कदाचिन्नैव जायते, । " तदाश्वासनादाहारमथाहमपि नात्यजम्. ॥ ६७१ ॥



For Private and Personal Use Only

विवाहैस्तरुवल्लीनां, योजने युग्मपक्षिणां, । पूजनैः पुष्पचापस्य, कश्चित्कालो जगाम मे. ॥ ६७२ ॥
एकदा च वसन्तर्त्तौ स्मरसाम्राज्यदायिनि । विक्रियाकरणप्रौढे वन्यभूमिरुहामपि, ॥ ६७३ ॥
सेवितां बन्धुसुन्दर्या शुद्धान्तपरिचारिका । प्रातः कात्यायनी नामा मामागत्येदमभ्यधात्,–॥ ६७४ ॥
" देवी समादिशति–' अद्य भर्तृपुत्रि ! समागता । काम त्रयोदशी, तस्यां पूजायै पुष्पधन्वनः ॥ ६७५ ॥
गृहारामं समागच्छेः, कुसुमाकरनामकम् । मन्मथायतने, यात्रा यतस्तत्र भविष्यति. ॥ ६७६ ॥
विग्रहोपशमाय त्वं वज्रायुधचमूपतेः । पित्रा मन्त्रिगिरा दत्ता, श्वो भावी सम्प्रदानविधिः " ॥ ६७७॥
अहं तु तत्समाकर्ण्य वज्रेणेव समाहता । प्राप्य मूर्च्छां, समासाद्य चैतन्यं समचिन्तयम्,–॥ ६७८ ॥
अधिक्षिपामि तं तातं मातरं मन्त्रिणोऽथवा ? । यद्वा ममैव दोषोऽयं पूर्वोपात्तघनांहसः ॥ ६७९ ॥
साञ्चन्त्याथ तनुत्यागमवोचं चेटिकां,–" शुभे ! । सम्प्रत्युन्निद्रकालस्यं, सायं तत्र मदागमः. " ॥ ६८० ॥
विसर्जितायां तस्यां च बभाषे बन्धुसुन्दरी,–" नोल्लङ्घ्यो भर्तृपुत्र्येषु मनोभवमहोत्सवः. " (?) ॥ ६८१ ॥
तदाग्रहादहं स्नात्वा वसाना पटलांशुकौ । अनुयाता जनैर्धूपं बलवासादिपादिभिः ॥ ६८२ ॥
रक्ताशोकतरोर्मूले सुप्रतिष्ठस्य भावतः । गत्वा भगवतः पूजामकार्षं चित्तजन्मनः. ॥ ६८३ ॥
आगत्य दृष्ट्वा पितरं, समुपास्य च मातरम्, । एकपात्रे तया सार्द्धं भुक्त्वोद्यानमथागमम्. ॥ ६८४ ॥
वृक्षकैरेणशावोघैः क्रीडाहंसयुगैः सह । भाविनं विरहं मत्वा, तत्रास्थां गाढगद्गदा. ॥ ६८५ ॥
अस्ताद्रिशिखरस्थस्ते पद्मिनीजीवितेश्वरे । समागमं, निजावाससमारोहं सौधमस्तकम्. ॥ १८६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विसर्जितजनाऽथोचे मुहूर्ते "बन्धुसुन्दरि ! । सखि त्वमपि गच्छाहं निद्रास्यामि सम्प्रति." ॥ ६८७ ॥
निर्यातायां ततस्तस्यां, झगित्युत्थाय तल्पतः, । नीवीसंयमनं कृत्वा सौधशृङ्गादवातरम्. ॥ ६८८ ॥
मन्दं मन्दमथागच्छमुद्यानं कुसुमाकरम् । वनपालनरभ्रान्ति स्थाणुष्वपि निबध्नती. ॥ ६८९ ॥
अपश्यं तत्र गत्वा च देवं कुसुमसायकम् । द्वारस्थैवाञ्जलिं पौष्प्यमक्षिपं, प्राणमं च तम्. ॥ ६९० ॥
प्राकारवलयद्वारि सौरभान्धीकृतालिनः । रक्ताशोकस्य शाखायामहं पाशमयोजयम्. ॥ ६९१ ॥
कृत्वा च गात्रिकाबन्धं, ' नमस्य चेष्टदेवते (?) । प्राञ्जलिः प्राङ्मुखीभूय व्योमलक्ष्याभ्यधामिदम्, ॥ ६९२ ॥
" लोकपालाः, कुमारं तं विहाय पुरुषान्तरम् । सस्पृहं न मया दृष्टं चक्षुषाऽपीह जन्मनि. ॥ ६९३ ॥
सत्यस्यास्यानुभावेन भर्त्ता भाविभवेऽपि मे । स एव भूयादित्युक्त्वा कन्धरान्यस्तपाशया ॥ ६९४ ॥
उत्प्लुत्यात्मा मया मुक्तस्तत उड्डीय पक्षिणः । पक्षक्षेपपटत्कारैर्हाहारवमिव व्यधुः. ॥ ६९५ ॥
अत्रान्तरे त्वरायातां शोकावेगविसंस्थुलाम् । क्रन्दन्तीं कष्टहाशब्दैरपश्यं बन्धुसुन्दरीम् ॥ ६९६ ॥
ग्रन्थिरुद्धगला वक्तुमशक्ता वामपाणिना । न्यषिध्य तां समाक्रन्दात् साप्याजघ्ने उरस्तटीम्. ॥ ६९७ ॥
अथोपायमपश्यन्ती गत्वान्वेष्टुं कमप्यसौ । मन्मथायतनं वेगादियत्येव मम स्मृतिः ॥ ६९८ ॥
परतः किं तयाकारि ? का वाऽवस्था ममाऽजनि ? । इति नाज्ञासिषं किञ्चिदुद्दामप्रलयोदयात्. ॥ ६९९ ॥
कियत्यामपि वेलायां किं नु संजातचेतना । उद्वहन्ती तनुं स्मेरपङ्कजाङ्कस्थितामिव ॥ ७०० ॥
यो मे वंशो, यथा जन्म, यथा वृद्धिर्यथा कलाः, । यथापहारो यामिन्यां, यथा यात्रा जिनालये ॥ ७०१ ॥



For Private and Personal Use Only

विचित्रवीर्यसंलापो यथा वप्राधिरोहणम्, । यथाऽलोकः कुमारस्य, निक्षेपश्च यथा स्रजः, ॥ ७०२ ॥
तिलकाधानतत्कालं यथा केनापि हेतुना । तस्योत्प्लुत्याम्बुधौ पातो, यथा तत्पृष्टतो मम. ॥ ७०३ ॥
इत्यादिकं विलापान्तविनिर्यज्जर्जरस्वराम् । शनैर्वदन्तीं मद्वृत्तमश्रौषं बन्धुसुन्दरीम्. ॥ ७०४ ॥
"कोऽयमाप्ततमो यस्य वदत्येषा कथा मम ?। कस्य चायं तनुस्पर्शः सुधासारमनोहरः ?" ॥ ७०५ ॥
इति ध्यात्वा घनानन्दा मन्दोन्मीलितलोचना । तमेव सहसाद्राक्षं पूर्वदृष्टं नृपात्मजम्, ॥ ७०६ ॥
मारज्वरोचितं वेषं दधानं सर्वतस्तनौ । वीजयन्तं निजोत्सङ्गे कृतां मां कन्दलैर्दलैः. ॥ ७०७ ॥
व्यतर्कयं च सम्भ्रान्ता " पाशग्रन्थिव्यथातुरात् । ममैव हृदयादेष नूनं प्रादुरभूद्बहिः." ॥ ७०८ ॥
रसान्तरमनाख्येयं सिद्धसारस्वतैरपि । वेदयन्ती किमप्यापं पुनर्विह्वलतामहम्. ॥ ७०९ ॥
पृष्टा च बन्धुसुन्दर्या देहस्वास्थ्यं पुनः पुनः । कुमारस्याङ्कपर्यङ्कादुत्थायारादुपाविशम्. ॥ ७१० ॥
सदित्वा (?) साप्यवोचन्मां " सखि ! तेजोऽनुभावता । ज्ञातराजान्वयोत्पादं पश्याmुं जीवितप्रदम्. ॥ ७११ ॥
खिन्नोऽपि हि ममाक्रन्दं श्रुत्वोत्प्लुत्यासिधारया । छित्वा पाशमधः पाते त्वां प्रत्यैच्छदयं भुवि. ॥ ७१२ ॥
तदेष उपकारित्वात् प्रणामादिकमर्हति " । इत्युक्त्वा कन्धरापाणि मां प्रणाममकारयत्. ॥ ७१३ ॥
कृतप्रतिप्रणामोऽसौ बभाषे बन्धुसुन्दरीं । " आशैशवे त्वमेवास्या गतवत्युपकारिताम्. ॥ ७१४ ॥
इदं चायुक्तमेतस्यां महानर्थकरे मयि, । यदुक्तमुपकारीति वाचा लज्जानिबन्धनम्. " ॥ ७१५ ॥
साऽप्यवादीत्–"महानर्थहेतुरस्याः कथं भवान् ?" सोवोचत्–"शक्यते वक्तुं न रहस्यमिदं मया." ॥ ७१६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तेन तज्ज्ञापने चक्षुर्मन्मुखं प्रति चिक्षिपे. । निभृतं ज्ञातवृत्तान्ता कर्णेऽकार्षमहं च ताम्. ॥ ७१७ ॥
अथ सा तं समालोक्य पाणिमाकृष्य मामकं । साध्वसोत्तरलं प्रीताऽयोजयत्तस्य पाणिना. ॥ ७१८ ॥
अथाब्धिपातादारभ्य जातविश्रम्भया मया । पृष्टः स पूर्ववृत्तान्तमाख्यातुमुपचक्रमे– ॥ ७१९ ॥
" तव सुभ्रु ! तिरोभावे तदा निपतितोऽम्बुधौ । शुश्रावाम्भोदगम्भीरां वाचमाकस्मिकीमहं– ॥ ७२० ॥
" कुमार ! किमिदं तीर्थमपश्चिमजिनप्रभोः । प्रपाततीर्थैः सत्त्वानां प्रलयार्थैः समीकृतम् ? " ॥ ७२१ ॥
" क एषः ? " इति सञ्चिन्त्य विकासितविलोचनः । प्रहृष्टनाविकां नावं स्वसैन्यान्ते व्यलोकयम्. ॥ ७२२ ॥
रात्रावदर्शनात्खिन्नो राजलोको निनाय माम् । निवासं, तत्र चाहानि कियन्त्यप्यवाहयम्. ॥ ७२३ ॥
एकदा तु सखेदो मामागत्योवाच तारकः । "कुमारसामविच्छित्त्यै किमुपायो न चिन्त्यते ? ॥ ७२४ ॥
काञ्चीपुरीगमोद्योगस्तत्प्राक्प्रयथ विधीयताम्. । किं विस्मृतं कुमारस्य तया यत्सूचितं तदा ? ॥ ७२५ ॥
" काञ्चीमध्यं समायान्तं गृहीष्यामीति भाषणात् " । अत्रान्तरे प्रतिहारी मां प्रविश्य व्यजिज्ञपत्–॥ ७२६ ॥
" चन्द्रकेतुमहाराजपादान्ताल्लेखवाहकः । समायातो बहिर्भूमौ युवराज ! निष्ठति." ॥ ७२७ ॥
" शीघ्रं प्रवेशये" त्युक्त्वा, सा तं प्रावीविशद्द्रुतम्. । प्रणम्य सादरं सोऽपि पुरतो लेखमक्षिपत्. ॥ ७२८ ॥
तत्र चक्षे–" रिपुप्राप्तो राजा कुसुमशेखरः । द्रविडेशो ययाचेऽस्मान् दूतवक्त्रेण मित्रताम्. ॥ ७२९ ॥
प्रतिश्रुता च सा तस्मै, सैन्यं च प्रहितं पुरः । तच्च कल्याणिना गत्वाधिष्ठेयमविलम्बितम्. " ॥ ७३० ॥
अथाख्यं तारकं हृष्टः–"सखे ! सज्जो भवाधुना. " । तत्क्षणं दत्तयात्रश्च पुरं काञ्चीं समागमम्. ॥ ७३१ ॥



For Private and Personal Use Only

एकदेशे चमूं मुक्त्वा तव पित्रा कृतादरः । त्वद्दिदृक्षाशयासर्वां व्यचरं परितः पुरीम्. ॥ ७३२ ॥
अद्य तु प्रातरेवाहं श्रुत्वा यात्रामिहागमम्. । अनयं च दिनं चित्रैः कुतूहलविलोकनैः ॥ ७३३ ॥
सायं यात्रावसानेऽथ प्रेष्य सर्वं परिच्छदम् । उपासितोऽनुगैर्द्वित्रैरत्रैव शयनं व्यधाम्. ॥ ७३४ ॥
रात्राविन्दुकरस्पर्शादुग्रदाहज्वरातुरः । साक्रन्दाभ्यर्थनेनास्याः परापं तव सन्निधिम्." ॥ ७३५ ॥
इत्युक्त्वा विरते तस्मिन्नभ्यधाद्बन्धुसुन्दरी–। " पिता प्रातरिमां दाता वज्रायुधचमूपतेः, ॥ ७३६ ॥
अपहारस्ततः श्रेयो तस्याः" तामभ्यधात्त्वसौ–। " साम्यं वज्रायुधेनैव ममैवं कुर्वतो भवेत्, ॥ ७३७ ॥
तदत्र तद्विधातव्यं, यज्जायेत समञ्जसम्. " । अथ प्रापय्य मां गेहं, स यातः शिबिरं निजम्. ॥ ७३८ ॥
खेचरापहृतेरर्वाङ्मद्वृत्तं बन्धुसुन्दरी । अम्बायाः सर्वमाचख्यौ, तयाप्याख्यायि मत्पितुः. ॥ ७३९ ॥
सोऽभ्यधाज्जातवैवर्ण्यो–"देवि ! मन्त्रिगिरा मया । वज्रायुधस्य दत्तेयं, प्रागस्याः सम्प्रदानकम् ॥ ७४० ॥
अस्मै च दीयमानेयं तूर्णं सृजति जीवितम्. । न दीयते यदि त्वेष तदा विघटते रिपुः. ॥ ७४१ ॥
तदेष मम सङ्कल्पः–स्वल्पलोकपरिच्छदा । इयं देशान्तरे रात्रावस्यामेव विसर्प्पति, ॥ ७४२ ॥
प्रकाश्यते च लोकेषु स्मरायतनजागरात् । आयुष्मती यथा प्राणैर्वियुक्ता शूलपीडया." ॥ ७४३ ॥
इत्युक्त्वासौ विदल्लेन मामाकार्य सगद्गदः । परिष्वज्य कृतामङ्के स्नेहसारमभाषत–॥ ७४४ ॥
"पुत्रि ! त्वदपहारादि न मां केनापि सूचितम् । माभने प्राणनाशेऽपि त्वां प्रयच्छामि शत्रवे, ॥ ७४५ ॥
किन्तु प्रवासजः क्लेशस्त्वया सह्यः कियानपि. । कुरु वत्से !ऽधुनैव त्वं यात्रां देशान्तरं प्रति. " ॥ ७४६ ॥

अथोवाच सवित्री मे–"मलयप्रस्थवासिनि । देव ! प्रशान्तवैराख्ये यात्वेषा तापसाश्रमे, ॥ ७४७ ॥
यत्रादावार्यपुत्रेण सहाभूद्दर्शनं मम, । आस्ते शान्तातपो नाम यस्मिन् कुलपतिः शर्मा. ॥ ७४८ ॥
तस्मिन्नेषा सुखं स्थात" इत्युक्ते तत्कालसज्जिताम् । आरुह्य करिणीं कैश्चिदनुयातास्त्रपाणिभिः ॥ ७४९ ॥
तरङ्गलेखया सख्या पित्राधिष्ठितया युता । निरागच्छं क्रमेणाथ परापं तत्तपोवनम्. ॥ ७५० ॥
विसर्जितसहाया च त्यक्ताऽशेषविभूषणा । अस्थां तापसकन्याभिस्तत्र नित्यं कृतादरा, ॥ ७५१ ॥
सेचनं बालवृक्षाणामेणकानां विपोषणम् । मार्जनं पर्णशालानां विदधाना यदृच्छया. ॥ ७५२ ॥
अन्यदा याममात्रेऽह्नि विप्रं कुलपतेः पुरः । वदन्तं तस्य वृत्तान्तमश्रौषं काञ्चीदेशीयम्. ॥ ७५३ ॥
यथा–"कामत्रयोदश्याः प्रदोषे रिपुणा सह । युध्यमानः सयोधोऽसौ शायितो दीर्घनिद्रया." ॥ ७५४ ॥
तदाकर्ण्य क्षणं मूर्च्छामनुभूयाश्रमादहम् । निर्याय मुनिभिः शून्यं वेलातटमुपागमम्. ॥ ७५५ ॥
प्रलप्य सुचिरं तत्र परित्यक्तुमनास्तनुं । वालुकारणितं श्रुत्वा पृष्ठतश्चक्षुरक्षिपम्. ॥ ७५६ ॥
अपश्यं च स्खलत्पादा रयेण स्रस्तवल्कलाम् । तरङ्गलेखामायान्तीमम्भपूर्णकमण्डलुम्. ॥ ७५७ ॥
अथ सञ्जातवैलक्ष्या झगित्यासन्नवर्त्तिनः । म्रियमाणैर्मृतैः प्राज्यैः क्रान्तमूलस्य पक्षिभिः, ॥ ७५८ ॥
कालकूटोत्करस्येव पिण्डितस्याब्धिमन्थने । फलं किंपाकवृक्षस्य परिपक्वमखादिषम्. ॥ ७५९ ॥
अथ स्वच्छशिलामेकामाश्रित्य समुपाविशम् । ततस्तरङ्गलेखापि मामेत्य निरभर्त्सयत्. ॥ ७६० ॥
अहं च ध्वस्तचैतन्या कियत्यापि हि वेलया । दूरापास्तविषावेगा विकाशितवती दृशौ. ॥ ७६१

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऐक्षे च दारवीयस्य प्रासादस्यान्तरे स्थिताम् । स्वपट्टांशुकसंछन्नामेकामम्भोजतल्पगाम्. ॥ ७६२ ॥
दत्तदृष्टिः पुरोभागे प्लवमानं निकेतनम् । सरस्यदृष्टपारेऽस्मिन् दृष्ट्वा विस्मयमावहम्. ॥ ७६४ ॥
पुनः कर्तुं तनुत्यागं सरःपातकृतोद्यमा । तेनैव पट्टवस्त्रेण बध्नन्तीं गात्रिकामहम्. ॥ ७६५ ॥
ताडीपत्रमयं लेखमपश्यं बद्धमञ्चले । उद्वेष्ट्य कौतुकेनाथ स्वैरमवाचयम्. ॥ ७६६ ॥ ·
“ स्वस्ति, राजाधिराजस्य चन्द्रकेतोः पदाम्बुजे । अलिना युवराजेन नाम्ना समरकेतुना ॥ ७६७ ॥
श्रीकाञ्च्यां द्रविडाधीशवंशकैरवचन्द्रिका । निर्वाप्यते निजक्षेमज्ञप्त्या मलयसुन्दरी, ॥ ७६८ ॥
सुभ्रु ! कामोत्सवे रात्रावुद्याने तत्र निर्जने । स्मरामि सततं तत्तत्तव विश्रम्भचेष्टितम्. ॥ ७६९ ॥
किञ्च विज्ञाप्यतेऽत्रैव साश्लेषं बन्धुसुन्दरी–। ‘जितेऽपि द्विपि दैवेन कृतो मे न मनोरथः’ ॥ ७७० ॥
[ श्रुत्वात्यद्भुतमस्मदाजिर्ललितं वैतालिकेभ्यः प्रगे प्रीतात्काञ्चीनराधिपात्तव सखीं प्राप्यादरप्रार्थिताम् ।
वोढास्मीति मनोरथः रथगयतो वाच्यं तदा योऽभवन्नाऽधन्यस्य जितेऽपि विद्विपि स मे दैवेन संपादितः ॥ ] ”
अथ निश्चित्य जीवन्तं प्रियं किञ्चित्प्रमोदभाक् । यावत्तिष्ठामि तद्वेश्म तावत्तीरं तरद्गतम्. ॥ ७७१ ॥
ततोऽवतीर्य शौचान्ते कृतदेवार्चनाविधिः । द्वित्रानुगायुतामैक्षे नारीं परिणताकृतिम्. ॥ ७७२ ॥
सा मामाभाषयामास–“ वत्से ! मलयसुन्दरि ! । कुतस्त्वमिह ? किंचैका ? किमेतत्तव वल्कलम् ? ” ॥ ७७३ ॥
अथ श्लिष्टवती गाढमाविर्भूताश्रुसन्ततिः । चिन्तयन्त्यहमप्येनां चित्रलेखेत्यवागमम्. ॥ ७७४ ॥
अत्रान्तरे सितच्छत्रश्रेणिछन्ननभःपथा । महिषी चक्रसेनस्य सर्वखेचरचक्रिणः ॥ ७७५ ॥

For Private and Personal Use Only

पत्रलेखाभिधायाता, सापृच्छत्स्वपरिच्छदम् । " विमानं वत कस्येदं सुन्दरं हारिचन्दनम् ? " ॥ ७७६ ॥
जगौ मुक्तावली नाम नियुक्ता कोशरक्षणे–। " देवि ! विज्ञायते युक्त्या, गतो यन्मार्गणाविधौ ॥ ७७७ ॥
गन्धर्वकः सुवेलाद्रौ, तत्तेनेदमिहाहृतम्. । वासोयुगमिदं तस्य भर्तृपुत्र्या यतोऽर्पितम्. " ॥ ७७७ ॥
" क्व वराकः सः ? " इत्युक्त्वा चित्रलेखान्तमागता । सा तु नीचैरपृच्छत्तां–"सखि ! केयं तवान्तिके ?"॥७७८॥
अथ निश्वस्य साऽवोचत्–" स्वसा यत्ते यवीयसी । आसीद् गन्धर्वदत्तेति, विदितं तत्तवापि हि–॥ ७७९ ॥
दशहायनदेशीया सुवेलाद्रौ पितुर्गृहे । सा वसन्ती गता दाक्ष्यं कलासु सकलास्वपि ॥ ७८० ॥
कदाचिदथ वैताढ्ये वैजयन्तीं निजां पुरीम् । मातामहेन नीतासौ द्रष्टुं लास्यस्य कौशलम्. ॥ ७८१ ॥
तत्र भूपेऽभ्यमित्रीणे समेत्य जितशत्रुणा । सामन्तेन रिपोर्दत्तोऽवस्कन्दो रजनीमुखे. ॥ ७८२ ॥
तामन्तर्वंशिकेनाथ दीनां समरकेलिना । आदायान्तःपुराद्व्योम्ना चेले त्वत्पितुरालये. ॥ ७८३ ॥
गच्छता च प्रहारार्त्त्यावतीर्णः तापसाश्रमे । प्रशान्तवैरे निक्षिप्योत्सङ्गे कुलपतेश्चेमाम् ॥ ७८४ ॥
विपन्नः सुगतिः,तां च राजा कुसुमशेखरः । तत्रायातो मुनिप्रत्तां परिणिन्ये यथाविधि. ॥ ७८६ ॥
काञ्चीं निनाय चक्रे च पट्टदेवीं, क्रमेण सा । असूत स्फारलावण्याभिरामेकां तनूद्भवाम्. ॥ ७८६ ॥
मलयः परिपाट्यास्याः प्राप्तिहेतुरियं ततः । कृता पित्रा समालोच्य नाम्ना मलयसुन्दरी. ॥ ७८७ ॥
इयं च पश्चशैलस्थे प्रासादे सुरनिर्मिते । अपश्चिमजिनेशस्य निर्वाणदिवसात्कृताम् ॥ ७८८ ॥
द्रष्टुं पक्षावधि यात्रां मया तत्रैव यातया । हत्वा विद्याधर्नीता वीक्षिता कार्त्तिकीनिशि. ॥ ७८९ ॥



For Private and Personal Use Only

श्रुत्वा च सा मामाश्लिष्य शोकानन्देन सङ्कुला । समादाय समागच्छदिदं दिव्यजिनालयम्. ॥ ७९० ॥
विधाय देवतापूजां नेतुं गेहमतत्त्वरत् । ज्ञात्वा च मामिह स्थित्या मुनिकन्याव्रतग्रहाम् ॥ ७९१ ॥
मठस्यास्य त्रिभूमस्य मध्यभूमिं वितीर्य मे । इमां चतुरिकां नाम प्रायच्छत्परिचारिकाम्. ॥ ७९२ ॥
ययौ गेहमथारुह्य विमानं हारिचन्दनम्. । अहमादिजिनाभ्यर्चामिहैवास्थां वितन्वती ॥ ७९३ ॥
प्रियसङ्गममन्त्रं च जपन्ती प्रतिवासरम् । प्रशान्तवैरवृद्धाभ्यस्तापसीभ्यः समागतम्." ॥ ७९४ ॥
इत्युक्त्वा निजवृत्तान्तं विरतायामवादिषम्–। " त्वत्प्रियः क्षेमवानास्ते नित्यं मलयसुन्दरि ! ॥ ७९५ ॥
प्रथमालोकनादर्वाक् तद्वृत्तं वेद्मि विस्तरात्, । सङ्गमो नचिरादेव भविता तेन तेऽधुना, ॥ ७९६ ॥
किं त्वेतदेवाविज्ञातं कथं भावीति " साभ्यधात्–। " कुमार ! किं तवानेन तत्क्षेमेणैव मे सुखम् ? ॥ ७९७ ॥
दुःखाकरोति किं त्वेतद्दूरीभूतेऽधुना त्वयि । सोऽत्यन्तनिविडप्रेमा कामावस्थां प्रपत्स्यते ?" ॥ ७९८ ॥
अथावोचं " वृथारम्भकार्यं मलयसुन्दरि ! । ध्यानं क्लेशफलायैव " सोवाच. " किमु दुष्करम् ? ॥ ७९९ ॥
लेखसाध्यमिदं, किन्तु न कोऽप्यत्रास्ति सन्निधौ." । अथागत्य शुकः कश्चिद्वादिशेत्यवदत्पुरः. ॥ ८०० ॥
तद्वाचाद्भुतमास्यं मेऽपश्यन्मलयसुन्दरी । " विसृष्टजातिःकोऽप्येषः " इत्यहं तु व्यचिन्तयम्. ॥ ८०१ ॥
लिखितं धातुरागेण लेखं क्षिप्त्वा तदग्रतः । अवोचं " भद्र ! लौहित्यतटावासिचमूपतेः ॥ ८०२ ॥
प्राप्यः कमलगुप्तस्य लेखोऽयं गुप्तवृत्तिना " । स तु चञ्चुपुटे कृत्वा तं झगित्युत्पपात खम्. ॥ ८०३ ॥
अत्रान्तरेऽचलन्यस्तधातुमुद्रमिवाम्बरम् । रराजाम्बरमस्तस्थे लोहितायति भास्करे. ॥ ८०४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगमिनि विधौ पत्यौ रजन्या तिमिरच्छलात् । कस्तूरिकारसैर्लिप्तं त्रिलोकीमन्दिरोदरम्. ॥ ८०५ ॥
अथादिमे निशायामे कृतसायन्तनक्रियः । मठाग्रभुवमारोहमुद्योते रजनीपतौ. ॥ ८०६ ॥
प्रदोषापरप्रहरे–रत्नमण्डपिकाजिरे । सन्निविष्टामुपागच्छं ततो मलयसुन्दरीम्. ॥ ८०७ ॥
ततश्चतुरिकागत्य त्वरया तामभाषत–। "आस्ते चारायणा द्वारि कञ्चुकी भर्तृदारिके ! ॥ ८०८ ॥
ब्रूते च "बाढमस्वस्थतनुस्तिलकमञ्जरी. । मामानेतुमिहाप्रैषीत्तूर्णं मलयसुन्दरीम्." ॥ ८०९ ॥
अपृच्छत्तामथास्वास्थ्यहेतुं मलयसुन्दरी । सोवाच "अहमतीतेऽह्नि रन्तुं वनमयासिषम् ॥ ८१० ॥
सैकते पादचारेण विहृता सापि कौतुकात्, । इतश्चेतश्च विक्रीडते तस्याः सर्वः सखीजनः. ॥ ८११ ॥
सा तु पुष्पोच्चयव्यग्रा पर्यटन्ती वनावनौ । विवेशैलालतावेश्म च्छन्नं घनतमद्रुमैः. ॥ ८१२ ॥
अथाञ्जनाचलतुङ्गो नभस्तोऽवनताननः । सरस्यदृष्टपाराख्ये पपातातार्कितः करी, ॥ ८१३ ॥
तत्याजातिवित्रासो भर्तृपुत्र्याः सखीजनः । पलाय्याचलकुञ्जादौ कोऽपि क्वापि न्यलीयत. ॥ ८१४ ॥
क्षणाद्विभीषिकोच्छेदे देवी तिलकमञ्जरी । नतवक्त्रा सलज्जेव लतागेहाद्विनिर्ययौ. ॥ ८१५ ॥
स्थित्वा समुल्लसत्स्वेदजलार्द्रवसना क्षणम् । मन्दं मन्दं तदेवासौ लतावेश्म पुनर्गता. ॥ ८१६ ॥
क्षणं स्थित्वाथ तद्द्वारि समुद्विग्ना वनभ्रमिम् । विधायोदञ्चितग्रीवं प्रवृत्ता वीक्षितुं दिशः. ॥ ८१७ ॥
तां दृष्ट्वाऽचिन्तयं–" किं स्यात्सखीमार्गणतत्परा ? । विप्रलब्धाथ केनाप्युदाराकृतिधारिणा ? " ॥ ८१८ ॥
इत्थमाशङ्कमानायां मय्यागत्य सखीजनैः । अनिच्छन्त्यपि सा नीता विहिताभ्यर्थनैर्गृहम्. ॥ ८१९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रापि त्यक्तभुक्त्यादिरनैषीत्माक्तनं दिनम्. " । इत्युक्ते साध्वसोन्मुक्तावादीन्मलयसुन्दरी–॥ ८२० ॥
" भद्रेऽल्प एव रोगोऽयं, किमकालागमेन मे ? । सह चारायणेन त्वं गत्वाश्वासय ताम्, इतः ॥ ८२१ ॥
ब्रूहि चैनां यथा " ऽऽयातो मेघवाहनभूभुजः । भारतक्षेत्रनाथस्य नन्दनो हरिवाहनः ॥ ८२२ ॥
स्थितो मदनुरोधेन सोऽत्रैवाद्यतनं दिनं, । तमुत्सृज्य ममागन्तुमयुक्तम् " इति नागता. " ॥ ८२३ ॥
गतायां च ततस्तस्यां स्वानुभूतनिवेदनैः । स्थित्वा शयनशालां स्वां ययौ मलयसुन्दरी. ॥ ८२४ ॥
अहं त्वगच्छमत्यच्छं तत्रैवायतविस्तृतम् । चन्द्रकान्तशिलातल्पं कल्पवृक्षांशुकावृतम्. ॥ ८२५ ॥
चक्रे च पुनरायाता पदसंवाहनं मम । शनैश्चतुरिका तत्र सुखस्पर्शकराम्बुजा. ॥ ८२६ ॥
" अरे चेतस्त्वया नीतो यत्कृतेऽहं दशामिमाम् । प्रवर्त्तेथास्तथा न स्यामुपहासपदं यथा. " ॥ ८२७ ॥
अथ रात्रावतीतायां कोऽपि दिव्यपुमानिमम् । सुश्लोकमपठद्दूरादायात इव मागधः–॥ ८२८ ॥
" प्रभातप्रायासौ रजनिररुणज्योतिररुणं रुणद्धीदं रोदो दिशि दिशि तमस्ताम्यतितमाम् ।
प्रभाच्छिद्रश्चन्द्रो दलति दलमैत्री जलरुहाम् । रहोऽनुत्साहस्य श्लथय नृप निद्रासुखरसम्. " ॥ ८२९ ॥
सविस्मयश्च तच्छ्रुत्वा समुत्थायोदिते रवौ । सरस्यदृष्टपाराख्ये स्नात्वोपात्तकुशेशयः ॥ ८३० ॥
देवतायतने तत्र युगादिपुरुषोत्तमम् । कृतपूजः सदर्थाभिर्वाग्भिरस्ताविषं चिरम्. ॥ ८३१ ॥
अथेन्द्रनीलवेद्यङ्कमाश्रितायास्तदङ्गणे । गत्वा मलयसुन्दर्या न्यविशं नातिसन्निधौ. ॥ ८३२ ॥
ततश्चतुरिकागम्य माम् नीचैर्न्यवेदयत्–। " एष्यत्यत्र कुमाराद्य देवी तिलकमञ्जरी. ॥ ८३३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भवदीयगुणश्रुत्या जातं तस्याः कुतूहलम् । आसितव्यं तदत्रैव क्षणं कल्याणमूर्त्तिना. ॥ ८३५ ॥
वदन्त्यामिदमेतस्यां गर्जदगजघटाम्बुना । केकिपत्रातपत्रौघैरामुत्रितसुरायुधा ॥ ८३६ ॥
दण्डिसौवर्णदण्डालिद्युतिविद्युच्छटोज्वला । केदलीकदलीरम्या वाहवाहोल्लसद्धुनी ॥ ८३७ ॥
निरन्तरसितच्छत्रबलाकाश्रेणिबन्धुरा । राजहंसमनःक्षोभहेतुरालोकनादपि ॥ ८३८ ॥
घनद्युतानि रचयन्ती धामधामनिधेरपि । वर्षाश्रीर्देहबद्धेव प्राप विशेषकम् तिलकमञ्जरी. ॥ ८३९ ॥
प्राकारगोपुरद्वारि मुक्तपानपरिच्छदा । नभश्चरभटीवृन्दैः कृतरक्षा समन्ततः ॥ ८४० ॥
पार्श्वे मलयसुन्दर्या प्रविश्य समुपाविशत्. । सापि सप्रेम संस्पृश्य कराग्रेणेदमब्रवीत्. ॥ ८४१ ॥
" किमु प्रियसखि ! क्षामा ? किं वाऽस्वास्थ्यस्य कारणम् ? । कुतस्त्यक्तान्यकर्त्तव्या प्रातरद्य समागता ?" ॥८४२॥
इत्युक्त्वा मयि निक्षिप्तचक्षुर्लज्जानताननाम् । तामदत्तोत्तरामेव सादरं पुनरब्रवीत्–॥ ८४३ ॥
" सखि ! भारतवर्षार्द्धभूभुजः प्रथमोऽङ्गजः । श्रीमेघवाहनस्यायं कुमारो हरिवाहनः." ॥ ८४४ ॥
इत्युक्ते विवलद्वक्त्रा वीचीं शृङ्गारवारिधेः । उल्कां रागहुताशस्य बाणालीं पुष्पपत्रिणः ॥ ८४५ ॥
ज्योत्स्नां लावण्यचन्द्रस्य साभिलाषां सविस्मयाम् । सव्रीडां मयि दृष्टिं सुधावृष्टिमिवासृजत्. ॥ ८४६ ॥
"ततो मृगाङ्कलेखास्याः सखी मलयसुन्दरीं बभाषे–"भर्तृपुत्र्यद्य श्रुतैश्चतुरिकामुखात् ॥ ८४७ ॥
नाममन्त्राक्षरैरस्य महाभागस्य तत्क्षणम् । देव्यास्तिलकमञ्जर्याः शान्तो दाहज्वरोदयः." ॥ ८४८ ॥
तन्निशम्य किमाश्चर्यमचिन्त्यो महिमा सताम् । " इत्युक्त्वा द्रविडाधीशसुता मौनमशिश्रियत्." ॥ ८४९ ॥



For Private and Personal Use Only

अथ धैर्य समालम्ब्य तिर्यग्वलितदोर्लता । ताम्बूलमात्महस्तेन ददौ तिलकमञ्जरी. ॥ ८५० ॥
मामुवाच ततः काञ्चीविषयाधिपतेः सुता " कुमार ! प्राप्तरेखेयं कलासु सकलास्वपि ॥ ८५१ ॥
कौतुकं चेत्तदा पृच्छ, युवयोः शृण्वती वचः । येनाहमपि गच्छामि मुहूर्त्तं निर्वृतिं पराम्." ॥ ८५२ ॥
इत्युक्तोऽहं क्षणं स्थित्वा निभृतस्तामवादिषम् । "काञ्चीपतिसुते ! देवी नाभिज्ञा मम चेतसः ॥ ८५३ ॥
शृणोत्यन्योऽपि नैवोक्तं जनः संस्तववर्जितः, । ईश्वरः किं पुनर्लोको मुक्तस्नेहो निसर्गतः ? ॥ ८५४ ॥
तदत्र भवती कापि व्योमवर्त्मप्रचारतः । प्रस्थिता दक्षिणामाशां मलयाद्रिदिदृक्षया ॥ ८५५ ॥
जातशक्रावतारादिकौतुकालंकरिष्यति । यत्रयोध्यां, यथाबुद्धि प्रक्ष्यामि सकलं तदा. ॥ ८५६ ॥
अधुना तूचितं वक्तुं पुनर्दर्शनमेव मे." । इत्युक्त्वा स्वस्य सस्मार प्रागप्रागल्भ्यचेष्टितम्. ॥ ८५७ ॥
कृतलज्जास्मितोद्भेदानुचरीगणैः । मत्पुनर्दर्शनप्रश्नभीतेव सहसोत्थिता. ॥ ८५८ ॥
आरुरोहाग्रभूपृष्ठं मयि क्षिप्तक्षणा मुहुः । चक्रे शीतमणिस्तम्भेष्वाश्लेषान्मुक्तसीत्कृतान्. ॥ ८५९ ॥
गाढहस्ताङ्गुलीयन्त्रैः क्षिप्तैः शुक्तिजलेष्टुभिः । आजघान प्रियाचाटुप्रह्वपारापतव्रजान्. ॥ ८६० ॥
सक्ता प्रियकराकृष्टया ललाटालकमालिकाम् । सखीनां कुटिलीचक्रे कराङ्गुलिविवर्त्तनैः. ॥ ८६१ ॥
सशङ्कं चुम्बनं कृत्वा बन्धुबालकसन्ततेः । ताम्बूलं निजवक्त्रेण तद्वक्त्रेषु निचिक्षिपे. ॥ ८६२ ॥
अथोत्तीर्य चिरादेत्य काञ्चीपतिसुतान्तिकम् । मान्यवृद्धानुरोधेन प्रतस्थे सदनं प्रति. ॥ ८६३ ॥
कियद्गत्वा निवृत्ताथ मन्दुरा द्वारपालिका । उपेत्य त्वरयाऽवादीद् द्रविडाधिपतेः सुताम्. ॥ ८६४ ॥

"प्राञ्जलिर्भर्तृपुत्रि ! त्वां ब्रूते तिलकमञ्जरी । कुमारयुतयागत्यानुग्राह्यं मद्गृहं त्वया." ॥ ८६५ ॥
सोवाच–मन्दुरे ! नेदं वनवासिजनोचितम् । गत्वा तत्र कुमारस्तु भवत्वातिथ्यभाजनम्. ॥ ८६६ ॥
इत्युदीर्य चकारास्या विसर्जनमथागमत् । मृगाङ्कलेखा, सावोचद्–" उचितानुचितैरलम् ॥ ८६७ ॥
भर्तृपुत्रि ! समागच्छ, वक्ति देवी बहिःस्थिता, । "तावदत्र मया स्थेयं यावादार्यासमागमम्" ॥ ८६८ ॥
ततस्तदाग्रहं मत्वाऽचलच्चतुरिकायुता. । मृगाङ्कलेखाप्याकृष्य पाणौ चालयति स्म माम् ॥ ८६९ ॥
अगच्छदुपान्ते देव्याः, समारुह्य गजप्रियाम् । समं मलयसुन्दर्या जगाम निजमन्दिरम्. ॥ ८७० ॥
अहं च तद्विमानरथोऽगच्छं भूरिपरिच्छदः । विद्याधराधिनाथस्य नगरं रथनूपुरम् ॥ ८७१ ॥
पश्यन्नापातिनिःपातिमत्तस्तम्बेरमाकुलम् । मृगाङ्कलेखयोद्दिष्टं राजमार्गं समन्ततः. ॥ ८७१ ॥
उचे मृगाङ्कलेखा मां–"कुमार ! नगरं दृष्टम् ?" । "दृश्यते यन्न निर्भरं किं दृष्टम् ?" "तन्नदुष्करम्. "॥ ८७२ ॥
खेचरेन्द्रसुतावासवामसन्निधिवर्त्तिनम् । मृगाङ्कलेखानिर्दिष्टं प्रासादमगमं ततः. ॥ ८७३ ॥
मणिसोपानमार्गेण तस्मिन्नारुह्य काञ्चने । निविष्टस्यासने चक्रे क्रमशौचमसौ मम. ॥ ८७४ ॥
सादरार्पिततताम्बूलप्रत्यग्रकुसुमोच्चया । देव्यास्तिलकमञ्जर्या गतवत्यथ सन्निधिम्. ॥ ८७५ ॥
सा तु प्रविष्टमात्रैव मातुर्मलयसुन्दरी । अदर्शयत्स्वयं चागात् सौधं मद्दर्शनाशया. ॥ ८७६ ॥
तत्रोदीचीगवाक्षस्था मार्गश्रममिषादसौ । आप्तद्वित्रिसखीयुक्ता दिदेश शिशिरक्रियाम्. ॥ ८७७ ॥
कियत्यामथ वेलायां अवातरदहं पुनः । दृष्ट्वा तच्छून्यमासन्नं गृहोपवनमव्रजम्. ॥ ८७८ ॥

वेत्रिणी तत्र मामेत्य जगौ हरिणिकाभिधा । "कुमार ! विज्ञापयति देवी तिलकमञ्जरी–॥ ८७९ ॥
'स्नानादिकृत्यं कुरुतां कुमारस्त्वरितोऽधुना । वेलातिक्रमतः क्लिश्येदार्या मलयसुन्दरी." ॥ ८८० ॥
"यथाह देवी"–त्युक्त्वाहं तमेवावासमागमम्. । स्नातस्तत्र व्यधां भक्त्या पूजामादिजगत्प्रभोः. ॥ ८८१ ॥
उपात्तोपात्तनेपथ्यः प्ररूढस्थिरसख्यया । मृगाङ्कलेखया सार्कं क्षणं कृत्वाक्षदेवनम् ॥ ८८२ ॥
देव्या तिलकमञ्जर्या वारंवारं विसर्जितैः । विहिताभ्यर्थनो लोकैरगमं तन्निकेतनम्. ॥ ८८३ ॥
वैडूर्यकुट्टिमन्यस्तमुक्तास्वस्तिकशोभिनि । दिवापि शङ्क्यते यत्र तारादन्तुरितं नभः ॥ ८८४ ॥
इतस्ततश्चलद्भूरिसैरन्ध्रीनूपुरस्वनैः । कूजास्वाचार्यकं यत्र मरालीनां विधीयते ॥ ८८५ ।
यत्र स्फाटिकिभित्तीनां सत्तां विक्षिप्तमौक्तिकैः । विज्ञायागन्तुका दक्षाश्चरन्त्यप्राप्तविप्लवाः, ॥ ८८६ ॥
पविश्य तत्र दत्तार्घोऽव्रजमाहारमण्डपम्, । विचित्ररत्नखचितप्रणीतकनकासनम्. ॥ ८८७ ॥
सुवर्णपुत्रिकोद्धूततालवृन्तः शनैः शनैः, । बन्दिनीव पठत्यग्रे पञ्जरस्थे कलं शुके, ॥ ८८८ ॥
अभुक्तपूर्वमत्यन्तस्वादुतागुणसुन्दरम् । भुक्त्वाऽऽहारमुपस्पृश्य, स्थित्वा संकथया क्षणम्, ॥ ८८९ ॥
मृगाङ्कलेखावक्त्रेण देवीं गन्तुममोचयम्. । अथागत्य प्रतीहारी मन्दुरा मां व्यजिज्ञपत् ,–॥ ८९० ॥
" देव ! द्वारि शुकः कोऽपि तिष्ठति प्रवराकृतिः । ब्रूते च;–"प्रेषणेनाहं स्कन्धावासादुपागतः ॥ ८९१ ॥
कुमारं द्रष्टुमिच्छामि "इति" अहं तु स्मृतवानिदम्,–। "नूनं शुकः स एवायं, यस्य लेखोर्पितो मया." ॥८९२॥
"तूर्णं प्रवेशय" इत्युक्ता तं प्रवेशितवत्यसौ. । सोऽपि चञ्चुपुटाल्लेखं क्षिप्त्वाऽकार्षीज्जयध्वनिम् ॥ ८९३ ॥

तमवोचमथ श्रान्तं " वस्त्राद्यविषये त्वयि । स्वाधीनफलसम्पत्तौ भद्रातिथ्यं करोमि किं ? ॥ ८९४ ॥
तथापि कुरु मे तोषम् " इत्युक्त्वांङ्के न्यवेशयम्. । शय्यापाली ततो देव्याः कुन्तलेति समाययौ, ॥ ८९५ ॥
अभ्यधाच्च–" कुमार ! त्वां देवी विज्ञापयत्यदः,–। " मृगाङ्कलेखयाऽऽख्यातं मम त्वत्तोऽभ्युपेतया ॥ ८९६ ॥
यथा " पुरमलक्ष्यात्मा कुमारोऽद्य दिदृक्षते " । तन्निशीथाभिधं दिव्यं प्रावृणु त्वमिमं पटं, ॥ ८९७ ॥
अयं पद्महृदं द्रष्टुं गतायाः पद्मया मम । उपनीतो, ऽनुभावोऽपि कियानप्यस्य वर्णितः, ॥ ८९८ ॥
यथा " संवृतमेतेन देहिनं नेक्षते जनः, । अहिधाराविषव्याधिरक्षःशक्तीश्च हन्त्ययम् , ॥ ८९९ ॥
किञ्चैष स्पर्शमात्रेण दीर्घशापक्षयङ्करः." । इत्युक्त्वाच्छादयामास सर्वतस्तेन मत्तनुम्. ॥ ९०० ॥
सहसाथ मदुत्सङ्गाद्दिव्यमुत्क्षिप्य तं पटम् । ममाग्रतः पुमानेको बभूवोदग्रयौवनः. ॥ ९०१ ॥
अथ " गन्धर्वको गन्धर्कः " इत्याप्तविस्मयैः । उदघोषि वधूवृन्दैः, असौ तु वलिताननः ॥ ९०२ ॥
प्रकटं पटविश्लेषात् समालोक्यादरेण माम् । अनंसीदसमोल्लासिविस्मयस्मेरलोचनः. ॥ ९०३ ॥
" विनष्टः ' इति यो देवि ! शोचितः सुचिरं पुरा । गन्धर्वकः, स निर्यातः कुमारक्रोडतोऽधुना. " ॥ ९०४ ॥
इति प्रचलच्चेटीभ्यः श्रुत्वा सम्पन्नविस्मया । समं मलयसुन्दर्या देवी तत्र समाययौ. ॥ ९०५ ॥
कृतप्रत्युद्गमा यत्नान्मया परिजनाहृते । ततः सविभ्रमव्रीडं हेमपीठे न्यविक्षत. ॥ ९०५ ॥
मामालोक्य स्फुरत्तोषं पुरतो विहितानतिम् । आकृष्यार्यापदाम्भोजे गन्धर्वकमपातयत्. ॥ ९०६ ॥
अथावोचं " प्रसादस्ते पटोऽयं देवि ! तत्क्षणम् । मम बन्धुसमं सद्यो गन्धर्वकमयोजयत्." ॥ ९०७ ॥



For Private and Personal Use Only

ततः सविस्मया देवी काञ्चीराजतनूद्भवाम् । अपृच्छद् " आर्ये ! किं पूर्वं कुमारेणायमीक्षितः ? " ॥ ९०८ ॥
सा प्रत्युवाच–" वृत्तान्तं वेद्मि नाहमिमं सखि ! । कुमारमेव पृच्छ त्वं " ततश्चाहमवादिषम् ,– ॥ ९०९ ॥
" न केवलमयं, देवि ! त्वमप्येतत्प्रसादतः । दृष्टा मया." इत्यथावोचं वृत्तं चित्रपटोद्भवम्. ॥ ९१० ॥
गन्धर्वकमपृच्छं च, " तदास्मत्सन्निधेर्भवान् । उत्थाय क्व गत्वोद्देशे क्व स्थितः ? किं विलम्बितम् ? ॥९११॥
प्रादुर्भूतः कुतो वाद्य विद्युदुन्मेषवत्क्षणात् ? " । इति पृष्टः स निःश्वस्य साश्रु वक्तुं प्रचक्रमे,– ॥ ९१२ ॥
" तस्मिन्नेवान्हि सायाह्ने कुमार ! भवदन्तिकात् । गतस्त्रिकूटकूटस्थां खेचराधिपतेः पुरीम्, ॥ ९१३ ॥
विचित्रवीर्यमद्राक्षं, विमानं हारिचन्दनम् । प्राप्तं घर्मर्तुयात्रार्हं याचितं पत्रलेखया, ॥ ९१४ ॥
लेखं समरकेतोश्च वहन् बद्धं पटाञ्चले । गन्धर्वदत्तावीक्षार्थमापतमुत्तरां दिशम्. ॥ ९१५ ॥
श्रुत्वा प्रशान्तवैराख्यतापसाश्रमसन्निधौ । करुणाक्रन्दितारावमन्तरिक्षादवातरम्. ॥ ९१६ ॥
अपश्यं चाश्रुधाराभिरकालजलदागमम् । कुर्वाणां रमणीमेकामीषद्गलितयौवनाम्. ॥ ९१७ ॥
ततोऽपृच्छं " किमित्यार्ये ! करोषि परिदेवनम् ? " । साऽवादीत् " कुरु मे त्राणमपत्यप्राणरक्षणात् , ॥ ९१८ ॥
सर्वस्वभूता निःशेषदक्षिणाधिपतेरियम् । पुत्री गन्धर्वदत्ताया नाम्ना मलयसुन्दरी ॥ ९१९ ॥
वैरिभिर्विगृहीतेन किमप्याधाय चेतसि । समर्प्य मे त्रियामार्द्धे पित्रा निष्कासिता पुरात्, ॥ ९२० ॥
विधृता चाश्रमेऽमुष्मिम्, स्थिता वल्कलधारिणी । ॥ ९२१ ॥
किञ्चित्कालम् , इह त्वद्य प्राप्ता केनापि हेतुना । मार्गयन्त्येयं मया दृष्टा, निर्भर्त्स्यानुषयोदयात् ॥ ९२२ ॥

अनुयाता, 'श्रमक्लान्ता' इत्युक्षिता शीतवारिणा। पश्यन्त्या एव मे संप्रत्यभूदुच्छिन्नचेतना. ॥ ९९३ ॥
अतः पापस्वरूपाहमारब्धा परिदेवितुम्" । तन्निशम्य विभाव्यैनां कन्यामहमवादिषम्- ॥ ९२४ ॥
"आर्ये ! मार्भैर्विषस्यायं विकारोऽस्या विजृम्भते, । असौ सजीविताद्यापि, किन्तु दिव्यौषधीभुवि ॥ ९२५ ॥
गन्तव्यमनया." इत्युक्त्वा विमाने तां न्यधामहम्. । अकार्षं तल्पमम्भोजपत्रचन्दनपल्लवैः ॥ ९२६ ॥
स्वप्रावारेण सर्वाङ्गमप्यधां तां प्रथीयसा, । अवोचं चित्रमायं च-" दिनमेकमिह स्थितः ॥ ९२७ ॥
आर्यामिमां समाश्वास्य सुखितां त्वं सखे ! कुरु, । अहं त्वस्तविषामेतामिहानीयाविलम्बितः ॥ ९२८ ॥
दृष्ट्वा गन्धर्वदत्तां च गत्वाऽयोध्याभिधां पुरीम् , । प्रतिपन्नं कुमारस्य कर्त्तास्म्यालेख्यदापनम्. ॥ ९२९ ॥
यदि मे दैवयोगेन भवेत्तत्र विलम्बितम् । क्षिप्रं त्यक्तस्वरूपेण प्राणिरूपमलक्षितम् ॥ ९३० ॥
प्रतिपद्य त्वया नेयः कुमारो रथनूपुरम् , । साध्यसिद्धिर्यतोऽस्माकं महती तत्र तद्गमात्." ॥ ९३१ ॥
इत्युक्त्वाहं विमानेन वेगादुत्पतितो नभः. । अथैकशृङ्गाग्रे विमानं वीक्ष्य निश्चलम् ॥ ९३२ ॥
क्षिप्तचक्षुः पुरोऽद्राक्षं पुरुषं तीव्रतेजसम् । "नूनमस्य प्रभावोऽयमिति" सञ्चिन्त्य चेतसा ॥ ९३३ ॥
अभ्यधां,-किं महाभाग ! विमानं स्तम्भितं त्वया ? । किंवा तरुलतापाणिर्निवारयसि मे गतिम् ? ॥ ९३४ ॥
काञ्चीपतिसुताप्राणरक्षार्थमहमुद्यतः" । इत्थमुक्तोऽपि नाध्वानं यदाऽमुञ्चत्तदा रुषा ॥ ९३५ ॥
मयोक्तो-" वपुषा दिव्यः, नारको भवान्." । अथोवाच रुषा रक्तनेत्रः-" रे रे नराधम ! ॥ ९३६ ॥
विशुद्धधर्ममार्गस्थं दुःखितप्राणिवत्सलम् । नियुक्तं दुष्टशिक्षायै प्रभुलोकैर्न मामपि ॥ ९३७ ॥

यक्षं महोदरं वेत्सि शान्तायतनवासिनम् ? । कियद्वा ते स्वयं वच्मि ? पञ्चशैलजिनालये ॥ ९३८ ॥
प्राकारात्पतिता वार्द्धौ येयमुत्तारिता मया । स्थापिता च निजे स्थाने, सा तावद्गतचेतना. ॥ ९३९ ॥
तिलकान्तर्हितां योऽपि मन्वानः प्रेयसीं हृताम् । तत्रैव पतितो नीतः प्रोत्क्षिप्य सपरिच्छदः ॥ ९४० ॥
स्वकीयशिबिरं, सोऽपि कुमारोऽत्र न सन्निधौ. । तदरे क्रूरकर्माहं ? न त्वं ? यः पृथुलेऽम्बरे ॥ ९४१ ॥
मार्गान्तरं विहायास्य शक्रैरपि कृतस्तुतेः । देवताकृतनिष्पत्तेरादिदेवस्य वेश्मनि ॥ ९४२ ॥
शृङ्गाग्रेणास्थितो यानं यातुं वाञ्छसि लीलया, । तदितः पक्षविक्षेपाद्देवतावेश्मलङ्घनम् ॥ ९४३ ॥
स्वैरं यदि परं कर्तासि, आत्मीया प्रकृतिः पुनः । मत्स्वामिन्याः प्रसादेन नान्यथा ते भविष्यति " ॥ ९४४ ॥
इत्युक्त्वा दत्तहुंकारो यानं सरसि चिक्षिपे । निमज्ज्योन्मग्नवत्यत्र शुकभावमुपागमम्. ॥ ९४५ ॥
अमुक्तः प्राक्तनस्मृत्या तत्रैवाऽस्थां जिनालये, । नीतो मया यथा लेखः, प्रतिलेखो यथाहृतः, ॥ ९४६ ॥
कुमाराङ्कं यथारूढस्तथा सर्वं स्मराम्यहम्. । अभूदस्तविषावेगा कथं मलयसुन्दरी ? ॥ ९४७ ॥
पुंस्त्वं वा मे कथं जातमेतदज्ञातमत्र मे. " । तस्मिन्नित्युक्तवृत्तान्ते, विस्मिते सकले जने, ॥ ९४८ ॥
उद्वेष्ट्यावाचयं लेखं तं तदानीतमादरात्,–। "स्वस्त्यभीष्टतमोद्देशे सर्वविश्वोपकारिणः ॥ ९४९ ॥
हरिवाहनसंज्ञस्य राजसूनोः पदद्वयीम् । लोहित्यसविधावासात् स्कन्धावारात्सराजकः ॥ ९५० ॥
कुशली कमलगुप्तो नत्वा विज्ञापयत्यदः–। " लेखेन यत्समाज्ञप्तं यदन्यदपि सङ्गतम् ॥ ९५१ ॥
तदात्मनैव कर्त्तास्मि सर्वं राजप्रयोजनम्. । किन्तु प्रतिविधातुं मे स्नेह एवातिदुष्करः ॥ ९५२ ॥

For Private and Personal Use Only

युवराजस्य, येनासौ वृद्धशिक्षाद्यगोचरः " । अथ मां म्लानवक्त्रत्वात् स्वदेशगमनोत्सुकम् ॥ ९५३ ॥
ज्ञात्वा काञ्चीपतेः पुत्री जगौ तिलकमञ्जरीं–। " विसृज्यतां कुमारोऽयं सखि ! पर्याकुलं जनम् ॥ ९५४ ॥
समालोकयितुं सैन्ये, पुनरत्रागमिष्यति. " । ततो नतमुखी स्थित्वा जगाद खेचरेन्द्रजा,– ॥ ९५५ ॥
" सखि ! त्वमेव जानासि कर्त्तुं यदिह साम्प्रतम्. " । ददौ मे चित्रमायं च, तं च काञ्चीनृपात्मजा ॥ ९५६ ॥
उवाच,–"तूर्णमानेयः कुमारः सुमुख ! त्वया " । ततः प्रत्येकमापृच्छ्य यानारूढो विहायसा ॥ ९५७ ॥
पुरःसखेचरव्यूहः प्रतस्थे निजमण्डलम्. । अचिरेणैव तं प्राप्तश्चित्रमायमवादिषम्,–॥ ९५८ ॥
"यतो हृतो द्विपेनाहं तदिदं काननं सखे ! । तदत्र विश्रामं कुर्मो, निकटं शिबिरं पुरः " ॥ ९५९ ॥
इत्युदीर्यावतीर्णेन तत्रैक्षे सहसा मया । गजतानुगतः स्वैरं सञ्चरन्नुन्मदः करी. ॥ ९६० ॥
अभाणि चित्रमायश्च प्रत्यभिज्ञापुरःसरम्,–। "चित्रं सखे ! स एवायं यमदण्डः करी मम " ॥ ९६१ ॥
ततश्चानाय्य तं तेन समारुह्य प्रमोदतः । प्रविश्य शिबिरं पौरैः प्रणतः परितोषतः ॥ ९६२ ॥
स्वावासमव्रजं क्लृप्तविविधाचारमङ्गलः, तत्र स्थाने समायातः सामन्तादिगणावृतः. ॥ ९६३ ॥
अप्राक्षं,–" किमु नाद्यापि युवराजः समागतः ? । राजपुत्रोऽभ्यधादेको–" भवल्लेखो यदागतः ॥ ९६४ ॥
अनावेद्य कुमारोऽसौ तदैव निशि निर्गतः, । प्राग्ज्योतिषेश्वरभ्रात्रा दृष्टो मित्रवरेण च, ॥ ९६५ ॥
व्रजन्नुदीचीं निर्बन्धान्निरुद्धोऽपि न हि स्थितः " । तन्निशम्य ससैन्योऽहं निवर्त्तनकृताशयः ॥ ९६६ ॥
कौबेरीमचलं मां च चित्रमायोऽन्यदाऽब्रवीत् । "उक्तो मलयसुन्दर्या त्वामानेतुमहं मुहुः, ॥ ९६७ ॥

कुमार ! किं मया कृत्यं ? "निःश्वस्याथ तमभ्यधाम्,-। "वयस्य ! गच्छ, तां ब्रूहि; विना समरकेतुना ॥ ९६८ ॥
कथं ते दर्शयिष्यामि वक्त्रं ? तत्सम्प्रति त्वया । देव्यास्तिलकमञ्जर्याः समाश्वास्यं सदा मम " ॥ ९६९ ॥
इत्युक्त्वा तं विसर्ज्याहमविशं घनकाननम्. । एकदा च कृतावासे सैन्ये प्रचलितो बहिः ॥ ९७० ॥
गन्धर्वकं हयारूढं समायान्तं व्यलोकयम्. । उत्तीर्य प्रणतस्तेन कृतानामयभाषणः ॥ ९७१ ॥
शिलापृष्ठमधिष्ठाय तमासीनमभाणिषम्,-। "गन्धर्वक ! तदा कोऽभूद् वृत्तान्तः प्रस्थिते मयि ? ॥ ९७२ ॥
कथं वयं वने ज्ञाताः ? किमेकाकी त्वमागतः ?" । सोऽत्रोचत्-" त्वयि निर्याते कुमार ! निभृता क्षणम् ॥९७३॥
स्थित्वा काञ्चीपतेः पुत्री खेचरेन्द्रसुतां जगौ,-। " एकशृङ्गाद्रिगमनमनुजानीहि मे सखि ! " ॥ ९७४ ॥
सोवाच,-" कन्दमूलादि गृहोपवन एव ते । क्रीडाद्रिनिर्झरैः स्नानं, देवताराधनादि च " ॥ ९७५ ॥
इत्युक्त्वा धृतवत्येनां गाढोद्वेगविनुत्तये. । ततश्च क्रीडितस्नातभुक्ताद्युद्देशवीक्षणम् ॥ ९७६ ॥
विदधाना तदाभीक्ष्णं सा दिनान्यत्यवाहयत्. । अद्य तु प्रातरायातं चित्रमायं विलोक्य सा ॥ ९७७ ॥
चक्षुर्मलयसुन्दर्यां सविलक्ष्यं निचिक्षिपे, । पप्रच्छ सापि तं,-" क्वास्ते कुमारहरिवाहनः ? ॥ ९७८ ॥
कुतो वा नागतः ?" सोऽपि प्रणम्य प्रत्यभाषत-। " अस्ति श्रीसिंहलेशस्य चन्द्रकेतोस्तनूद्भवः ॥ ९७९ ॥
कुमारः समरकेतुः प्रत्यर्थिकरिकेसरी. । स तु, गन्धर्वकोक्तेन मयाऽत्र द्विपमूर्त्तिना ॥ ९८० ॥
कृतापहारमन्वेष्टुं कुमारं हारिवाहनम् । असिनैव सहायेन विवेशोत्तरकाननम्. ॥ ९८१ ॥
इतो यातः कुमारोऽपि तदन्वेषां गतो वनम् " । तस्मिन्निति वदत्येव, " हा ! कुमार ! तवाप्ययम् ॥ ९८२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बाढं सुकृतकर्माभूत्. वनक्लेशस्य कारणम्. " । इत्थं प्रलप्य सम्मोहं गता काञ्चीपतेः सुता. ॥ ९८३ ॥
वीजनाल्लब्धचैतन्यां तां चक्रे खेचरेन्द्रजा । अपृच्छच्च-"तथैवास्ति साकं समरकेतुना ? ॥ ९८४ ॥
संस्तवः किं ? तथा जातः किं वनाय तवापि सः ? । कथयेति " मुहुः पृष्टा सोवाच-"भज मूकताम्, ॥ ९८५ ॥
कुमारक्लेशमाकर्ण्य नाहं वक्तुमपि क्षमे "। साऽवादीत्-" किमिव क्लेशः ? त्वदाश्रमकृतस्थितिः ॥ ९८६ ॥
गवेषयति किं नैव निजमित्रं नभश्चरैः ? " । सहासमवदत्सापि "मुग्धे ! भूगोचरो ह्ययम्, ॥ ९८७ ॥
शृङ्गीव पक्षनिर्लूनः स्वैरं खे गन्तुमक्षमः "। इत्युक्ता व्योमयात्रायां विमानं पटुरंहसम् ॥ १९८ ॥
खेचराणां सहस्रेण मां च प्रहितवत्यसौ, । अभ्यधाच्च-"सहानीकं कुमारहरिवाहनम् ॥ ९८९ ॥
अदृष्टपारसरसस्तीराराम समानय." । यदादिशति देवीति "संलप्याहमपि क्षणात् ॥ ९९० ॥
चित्रयामोपदिष्टाध्वा वनमेतत् समागमम्, । परिच्छदमवस्थाप्य निःशेषं निकषा नदीम् ॥ ९९१ ॥
उत्सुकत्वादिहायातः स्वयमेकेन वाजिना "। इत्युक्त्वा त्वरितस्तेन विमानस्थः समागमम् ॥ ९९२ ॥
अदृष्टपारतीरस्थमाश्रमं खेचरैर्वृतः, । तत्र लौहित्यवास्तव्यस्कन्धावारो नभश्चरैः ॥ ९९३ ॥
शश्वत्सम्पादितेष्टार्थो दिनान्यस्थां कियन्त्यपि. । एकदा तु सुखासीनं भुक्तान्ते खेचराद्वृतम् ॥ ९९४ ॥
रत्नकोशाधिकृन्नत्वा शङ्खपाणिरुवाच माम्,-। " कुमार ! कोशलेशेन हारश्चन्द्रातपाभिधः ॥ ९९५ ॥
श्रीकरोर्पिकया सार्द्धं यात्रारम्भे समर्पितः, । मया मदन्तिके कालमेतावन्तमसौ धृतः, ॥ ९९६ ॥
इहाप्यानीत आस्ते, तत्स्वान्तिके क्रियतामयम् "। इत्युक्त्वा भास्वरं हारमुच्चिक्षेप करण्डकात्, ॥ ९९७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उच्चञ्चुभिश्चकोराद्यैराचान्तघनचन्द्रिकम्. । “ दृष्टोऽयमथवा स्पृष्टः संस्तुतो वा भवान्तरे ! ” ॥ ९९८ ॥
अहं त्विति तमाशङ्क्य गन्धर्वकमवादिषम्,–। “देव्यास्तिलकमञ्जर्याः कण्ठकन्दलसङ्गमम् ॥ ९९९ ॥
विहायान्यत्र हारोऽयं सौम्य ! नौचित्यमश्नुते, । तदेनं नय तत्रैव, मुद्रारत्नमिदं पुनः ॥ १००० ॥
कार्यं मलयसुन्दर्यां देवार्चायां कराङ्गुलौ ” । तमित्युदीर्य प्राहैषम्,अन्येद्युश्च समाकुला ॥ १००१ ॥
एत्य प्रणम्य लेखं मे पुरश्चतुरिकाक्षिपत्. । अहं तु जनितास्वास्थ्यः स्फुरता वामचक्षुषा ॥ १००२ ॥
विलम्बितं क्षणं लेखमादाय तमवाचयम्,–। “स्वस्त्येकशृङ्गे सम्राजस्तनुं श्रीहरिवाहनम् ॥ १००३ ॥
उदीर्णापारदुर्वारदुःखा तिलकमञ्जरी । विज्ञापयति ‘हारेण हृदयालम्बिनामुना ॥ १००४ ॥
(“ आश्लिष्य कण्ठममुना मुक्ताहारेण हृदि निविष्टेन । रुषैव वारिता मे त्वदुरःपरिरम्भणारम्भः ॥ ” )
रुषेव प्रतिषिद्धो मे परिष्वङ्गस्तवोरसः ’। तथापि यावज्जीवामि भवदायत्तजीविता ॥ १००५ ॥
तावन्नैव कुमारेण विरमर्त्तव्या मनागपि. ” । ततो गाढमनोदुःखदूरोत्तप्तो विसर्ज्य ताम् ॥ १००६ ॥
भृगुपातकृताकूतस्तस्मान्निरगमं शनैः, । विजयार्द्धगिरेः शृङ्गमारुह्याभिमतप्रदम् ॥ १००७ ॥
तीर्थं गवेषयन्नेकमपश्यंनृपनन्दनम्, । वसुधाधिपतेः पुत्र्या नवयौवनशोभया ॥ १००८ ॥
धार्यमाणं. कृतानत्या बाष्पप्लुतकपोलया. । दृष्ट्वा च द्विगुणोद्वेगस्तमाख्यं “किमु कानने ॥ १००९ ॥
इमामेकाकिनीं दीनां सौम्य ! त्यजसि बालिकाम् ? । कुत्र वा यातुमिच्छा ते ?” स उवाच–“अस्ति पर्वते ॥१०१०॥
इहैव गगनोल्लेखि शिखरं चण्डगह्वरम्, । प्रपाते कामदे तत्र पित्सुः संहारनामनि ॥ १०११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अनङ्गरतिनामाहं विद्याधरनृपात्मजः, । निर्वेदाच्चलितस्तूर्णमनुगन्तुमियं च माम् ॥ १०१२ ॥
मुमुक्षति निजप्राणानहं तु द्रष्टुमक्षमः । पुरस्तादेव पित्सामि " इत्युक्ते पुनरभाणिषम् ॥ १०१३ ॥
"मा मुचः स्वां तनुं, सौम्य ! राज्यं स्वीकुरु मामकम् । अन्यश्चेदभिलाषस्ते सज्जस्तस्यापि साधने." ॥१०१४॥
अथासौ मुदितोऽवादीद्–" अस्ति मे मन्त्रसहंतिः । साध्या वीरनरस्यासौ देवत्ताभिरधिष्ठिता, ॥ १०१५ ॥
तामाराध्यातिविक्रान्तः क्रमिकं देहि मे पदम्." । तद्वचोऽभ्युपगम्याहमात्तमन्त्रो यथाविधि ॥ १०१६ ॥
शिक्षिताराधनोपायो गिरिगह्वरमाविशम्. । तेनोपनीतपूजादिः, स्नातः सन्ध्यासु निर्झरे, ॥ १०१७ ॥
बद्धपद्मासनो बिभ्रदक्षालीं दक्षिणे करे । मन्त्रसाधनमाधातुमारेभे,ऽथ क्षपाचराः ॥ १०१८ ॥
मम सिद्धिविघाताय समाजग्मुः समन्ततः, । "प्रहिताः कोशलेशेन तवानयनहेतवे." ॥ १०१९ ॥
इत्युक्त्वा पुरतो लेखान् प्रणताः केचिदक्षिपन, । केचिदूचुः " मया दृष्टो युवराजोऽभिवर्द्धसे "॥ १०२० ॥
केचिदाक्षिपन्"कृपाहीन ! तान्ता तिलकमञ्जरी." । दृष्ट्वा चोत्कटधैर्यं मां कोपभ्रकुटिसङ्कटम् ॥ १०२१ ॥
कृत्वा ललाटमाटोपादाटीकन्त स्फुटायुधा । एवं च षट्सु मासेषु व्यतीतेषु समर्थिते ॥ १०२२ ॥
पूर्वसेवाविधौ याते स्वल्पशेषे जपाविधौ, । सहसैव स्फुरद्देहप्रभापिञ्जरिताम्बरा ॥ १०२३ ॥
एका सुरवधूरेत्य मधुरं मामभाषत । " देहि सत्त्वनिधे ! दृष्टिमष्टौ देव्यः समागताः, ॥ १०२४ ॥
प्रज्ञप्तिरोहिणीमुख्याः सत्त्वेनावर्जितास्तव. । वद कृत्यम्,"अथावोचं,–" भगवत्यनुयुज्यताम् ॥ १०२५ ॥
अनङ्गरतिनामायं यदर्थोयमुपक्रमः." । प्रत्यवोचदसौ,–" सौम्य ! परार्थैकमनेस्तव ॥ १०२६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विस्मिता चरितेनाहं, कल्पः कित्वेष शास्वतः–। येनैव रञ्जिताः सिद्धिरायान्ति तस्यैव देवताः. ॥ १०२७ ॥
किञ्चानेनापि नात्मार्थमर्थितस्त्वं, यतः शृणु,–। अस्मिन्नेवास्ति वैताढ्ये पुरं गगनवल्लभम् ॥ १०२८ ॥
उत्तंसमुत्तरश्रेणेरनुत्तरविभूषितम्, । तत्र विक्रमबाह्वाख्यश्चक्री गगनचारिणाम् ॥ १०२९ ॥
आसीत्पराक्रमाक्रान्तरिपुचक्रनतक्रमः, । 'अम्बुजानि गतश्रीणि, रौति खिन्नालिमालिका, ॥ १०३० ॥
चक्राः क्रन्दन्ति दूरस्थप्रेयसीभिः कृतस्वराः.' । इत्याद्यैश्चारणालीनां वचोभिर्दिवसात्यये ॥ १०३१ ॥
निर्णीतानित्यतः सोऽभूदपास्तविषयस्पृहाः । प्रपन्ने च जिनोद्दिष्टं तत्र मुक्तिपुरीपथम्. ॥ १०३२ ॥
शाक्यबुद्ध्यभिधो मन्त्री परमुद्वेगमुद्वहन । अपश्यन् गोत्रजं पुत्रमनङ्गरतिमादिशत् ॥ १०३३ ॥
बन्धुपुत्रं–यथा " तूर्णमेकशृङ्गनगं व्रज, । सुहृदन्वेषणायान्तं कुमारं हरिवाहनम् ॥ १०३४ ॥
कुरु तत्र त्वमद्यैव विद्यासाधनतत्परम्. । अयं हि पूर्वसंस्कारात् परोपकृतिवत्सलः ॥ १०३५ ॥
विधास्यत्यन्यथा नैतदित्येष मम निश्चयः, । अष्टापदे मुनिव्रातमुपास्य समुपागतैः ॥ १०३६ ॥
यतोऽस्य पूर्वजन्मोक्तं वीरसेनादिखेचरैः. । अथात्र हृतमागत्य विद्याराधनकर्मणि ॥ १०३७ ॥
मुमूर्षुदम्पतीव्याजात् त्वां नियोजितवानसौ. । तदाग्रहमिमं मुञ्च, मानयैताश्च देवताः. ॥ १०३८ ॥
शाक्यबुद्धेः कुरु प्रेयो, भव चक्री भुवस्तले." । इत्युक्त्वान्तर्दधौ साथ भेरीभाङ्कारसूचिता. ॥ १०३९ ॥
एत्य विद्याधराधीशाः प्रणेमुर्विनयेन माम् । नीत्वा च दिव्ययानस्थं शिखरे चण्डगह्वरे ॥ १०४० ॥
उत्तरश्रेणिराज्ये मामभ्यसिञ्चन् ममोदतः. । ततः पुरप्रवेशाय विज्ञप्तः पुरुदंशसा ॥ १०४१ ॥

For Private and Personal Use Only

दैवज्ञेन, समीपस्थमप्राक्षं परिषज्जनम्,—। " अयि ! कश्चिद्विजानाति चक्रसेनमहीपतेः ॥ १०४२ ॥
वेश्मोदन्तम् ? "अथोवाच द्वारपालः प्रणम्य माम्,— । " देवात्र दक्षिणश्रेणेः सम्प्रत्येव समागतः ॥ १०४३ ॥
त्वत्पाददर्शनाकाङ्क्षी द्वारे तिष्ठति दारकः." "आशु प्रवेशय." इत्युक्ते तेनाहूतं विषादिनम् ॥ १०४४ ॥
गन्धर्वकमपश्यं, तमेह्येहीति समाह्वयम्. । सोऽपि प्रणम्य मुक्ताश्रुरुपविश्य महीतले ॥ १०४५ ॥
तत्प्रवृत्तिं मया पृष्टः स्थित्वा क्षणमभाषत, ।—" श्रूयतां देव ! तन्नीत्वा तदालङ्करणद्वयम् ॥ १०४६ ॥
'कुमारस्येदं' इत्युक्त्वा भर्तृपुत्र्योर्मयार्पितम्. । कराङ्गुलौ चकाराथ मुद्रां मलयसुन्दरी. ॥ १०४७ ॥
स्मृतजन्मान्तरेवासावमुञ्चच्चाश्रु तत्क्षणम् । देव्यप्यारोप्य तं हारं कण्ठे तिलकमञ्जरी. ॥ १०४८ ॥
अथ प्रत्यवदं,—" देवि ! साकेतनगरे पुरे । शक्रावतारचैत्येऽसौ मेघवाहनभूपतेः ॥ १०४९ ॥
ज्वलनप्रभदेवेन प्रीत्या पाणौ कृतो निशि." । इत्थं मयि वदत्येव निमीलितविलोचना ॥ १०५० ॥
मुमोह सहसा देवी. स्थित्वा पर्यङ्क एव हि । चिरेण लब्धसंज्ञा च सखीनां मोहकारणम् ॥ १०५१ ॥
पृष्टापि नाख्यदुत्तापप्लपिता चानयन्निशाम्. । प्रातश्च ज्ञातवृत्तान्तावागतौ पितरावपि ॥ १०५२ ॥
विधूय प्रस्थिता गेहात्तीर्थयात्रापदेशतः, । अनेकमुनिभिः साकं भगवान्नाभिनन्दनः ॥ १०५३ ॥
निर्वाणगमनाद्यस्य महिमानमवीवृधत्, । स्मारं स्मारमिवाद्यापि श्रीनाभेयजिनाधिपम् ॥ १०५४ ॥
वातस्रस्तलतापुष्पैः सृजत्यश्रुकणानिव । तस्मिन्नष्टापदे गत्वा भरतेश्वरकारिताः ॥ १०५५ ॥
सप्रमोदं नमस्कृत्य प्रतिमा मणिनिर्मिताः । द्वीपान्तरसमायातं चारणश्रमणव्रजम् ॥ १०५६ ॥



For Private and Personal Use Only

स्थाने स्थाने नमस्यन्ती समाधिस्थिरविग्रहम् । महर्षिमेकमद्राक्षीदुपविष्टं शिलातले ॥ १०५७ ॥
सुरादिभिः कृतोपास्तिं तत्कालोत्पन्नकेवलम्, । तं प्रणम्य निविष्टा सा, दुःखितां तां विलोक्य च ॥ १०५८ ॥
सकृपः खेचरस्वामी वीरसेनाभिधोऽब्रवीत् ,–। " भगवन् ! पुरुषद्वेषं चक्रसेननृपाङ्गजा ॥ १०५९ ॥
किमेषा वहते ? किं वामुद्वहद्य निशामुखे ? । कुतो वा मुक्तभूषापि कण्ठे हारं दधात्यसौ ? ॥ १०६० ॥
इदं मे कथय. " इत्युक्तो मुनिर्वक्तुं प्रचक्रमे,–। " आसील्लीलावतंसाख्यं विमानं वसति सुरः ॥ १०६१ ॥
सौधर्मे शक्रतुल्यर्द्धिः प्रख्यातो ज्वलनप्रभः, । स बुद्ध्वा च्यवने बोधिं प्रकारान्तरदुर्लभम्, ॥ १०६२ ॥
कियन्नाकियुतो नाकादनाख्याय विनिर्ययौ. । प्रियङ्गुसुन्दरी नाम तत्प्रियाथ विषादिनी ॥ १०६३ ॥
प्रवृत्तिं वेदितुं तस्य जम्बूद्वीपमुपागमत्. । द्वीपान्तरगतेऽभीष्टे पूर्वमेव सुमालिनि ॥ १०६४ ॥
तद्भर्तृमित्रे दुःखार्त्ता सहागाच्च प्रियंवदा. । विजये पुष्करावत्यां गत्वा प्राकाञ्चनाचलात् ॥ १०६५ ॥
तीर्थाधिपं जयन्ताख्यमपृच्छद्विहिताञ्जलिः,–। " स्वामिन्नहं सखीयं मे प्रस्थिते पार्श्वमिष्टयोः, ॥ १०६६ ॥
तं निवेद्य, संयोगः क्व ताभ्यां नौ भविष्यति ? । कथं वा धर्मसम्प्राप्तिर्मर्त्यलोकेऽवतीर्णयोः ? " ॥ १०६७ ॥
इदं पृष्टो जिनोऽवादीद् ,–"शृणु कल्याणाभागिनि ! । ' अस्यैव जम्बूद्वीपस्य वर्षे भारतनामनि ॥ १०६८ ॥
अस्त्येकशृङ्गाद्री रत्नकूटश्च विश्रुतः, । भवत्योर्भविता तत्र क्रमशोऽभीष्टसङ्गमः, ॥ १०६९ ॥
विशिष्टधर्मयोगस्तु दिव्याभरणदर्शनात्. " । तं निशम्यैकशृङ्गाद्रेः शृङ्गे रत्नजिनालये ॥ १०७० ॥
प्रियङ्गुसुन्दरी दिव्यशक्तयाराममचीकरत्. । तत्र प्रतीक्षमाणा च पत्युरागमनं स्थिता. ॥ १०७१ ॥

प्रियंवदापि सिन्धुस्थरत्नकूटगिरिं ययौ, । तस्य प्रतीचि सान्वन्ते जिनेन्द्रमणिमन्दिरम् ॥ १०७२ ॥
विधाप्यावस्थिता भर्तुः स्पृहयन्ती समागमम्. । एकदा च समायान्तीं गत्वा नन्दीश्वरादिषु ॥ १०७३ ॥
प्रियङ्गुसुन्दरी देवीमपश्यत्सहसा श्रियम् । केकिकासरगोनाशसिंहवाहादिवाहनैः ॥ १०७४ ॥
देवीभिरुह्यमानाभिः परितः कृतसन्निधिम् । स्थित्वा क्षणं पुरः प्रेम्णा क्षिप्तदृष्टिं पुनश्चलाम् ॥ १०७५ ॥
सकोपेवाभ्यधात्,–" पद्मे ! यानान्नोत्तरसीह किं ? । प्रियङ्गुसुन्दरी बुद्धा विगतर्द्धिस्त्वयापि किम् ? ॥ १०७६ ॥
साऽवोचत्,–" सखि ! मां मुञ्च निर्गतायाश्चिरंगृहात् । मा कृथास्तावदधुना स्थानगमनानुबन्धम् ॥ १०७७ ॥
ममागमनहेतुं च शृणु,–" प्रातस्सखी तव । रत्नकूटे मया दृष्टा सोद्वेगाद्य प्रियंवदा, ॥ १०७७ ॥
तया च तव सन्दिष्टं,–" सखि ! मद्भाग्यदोषतः । ज्ञानिनोऽपि वचो मिथ्या जातमायुश्च मे तनु; ॥ १०७८ ॥
भवान्तरगताया मे सखि ! क्वापि स्मरिष्यसि, । मत्कारिते चैत्येऽस्मिन् सान्निध्यं कारयिष्यसि." ॥ १०७९ ॥
तद्वचः करुणं श्रुत्वा साप्युवाच सगद्गदा,–। मत्कृत्तीर्थेऽपि सानाथ्यं कः कर्त्ता कतिचिद्दिनैः ? ॥ १०८० ॥
अभ्यर्थयेऽधुना किं वा सुरेष्वाज्ञाविलोपिषु ? " । इत्युक्ते कमलावादीत्तदुद्वेगेन दुःखिता,–॥ १०८१ ॥
" विषादं त्यज, सन्दिष्टं मयैवेदमुरीकृतम्. " । अथोवाच प्रतीहारं सादरा सा महोदरम् ,–॥ १०८२ ॥
" प्रासादस्य त्वया भद्र ! तस्यास्य च दिवानिशम् । रक्षणीयोऽप्रमत्तेन क्षुद्रलोकादुपद्रवः. " ॥ १०८३ ॥
इत्युदीर्य निजावासं सत्वरा समुपागमत्. । प्रियङ्गुसुन्दरी त्वाप न पत्या सह सङ्गमम्. ॥ १०८४ ॥
क्षीणायुरवतीर्याथ विजयार्द्धमहीधरे । चक्रसेनस्य पुत्रीयमभूत्तिलकमञ्जरी. ॥ १०८५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उद्गाढस्वपतिभ्रमवासना च नरान्तरे । अबद्धप्रीतिरेवास्थादेतावन्तमनेहसम् ॥ १०८६ ॥
दिव्यहारमतीतेऽह्नि दृष्टः, पूर्वभवस्मृतेः । मुमोह, 'मत्प्रियश्लिष्टः' इति नैव मुमोच तम्." ॥ १०८७ ॥
इत्युक्ते विस्मयस्मेरसंसदभ्यर्थितो मुनिः । ज्वलनप्रभवृत्तान्तमथ वक्तुमुपचक्रमे,—॥ १०८८ ॥
"सोऽप्यत्र भारते वर्षे साकेतपुरभूभुजे । शक्रावतारचैत्यस्थो दिव्यं हारं वितीर्णवान. ॥ १०८९ ॥
ततो नन्दीश्वरं गत्वा वयस्यस्य सुमालिनः । सम्यग्दर्शनसंशुद्धिं चक्रे जिनमतोक्तिभिः. ॥ १०९० ॥
कृतकृत्यमथात्मानं मन्यमानो व्यलोकि च । शास्वतीं सिद्धचैत्यालीं कुलशैलादिषु स्थिताम्. ॥ १०९१
उपार्ज्य खेचरेन्द्रत्वभूत्या सह भवान्तरे । प्राप्तिं चरमदेहस्य जातदिव्यायुषः क्षये ॥ १०९२ ॥
मयैव दत्तसद्विद्याराधनस्य तनूद्भवः । तस्यैवाऽजनि साकेतस्वामिनो हरिवाहनः." ॥ १०९३ ॥
इत्थं निवेद्य तूष्णीके मुनौ तिलकमञ्जरी । अतत्वरत्सुमालिस्थं ज्ञातुं मलयसुन्दरीम् ,—॥ १०९४ ॥
कृतवल्कलनीरङ्गीं त्रपया प्रश्नमानसम् । विलोक्य तामथारेभे पुनर्वक्तुं तपोधनः—॥ १०९५ ॥
"सोऽपि वत्से ! विशुद्धात्मावतीर्णः स्वायुषः क्षये । सूनुः समरकेत्वाख्यश्चन्द्रकेतोरजायत." ॥ १०९६ ॥
इत्युक्त्वा मुनिरुत्तस्थौ, संविग्नश्च सभाजनः; । यथागतं जगामोरुभोगेषु विगताग्रहः. ॥ १०९७ ॥
भर्तृपुत्र्यभिभृत्यौघतत्कालप्रगुणीकृतम् । निजावासं ययौ प्राज्यविराजत्पटमण्डपम्. ॥ १०९८ ॥
तस्मिंश्च कल्पनीयान्नं तपःक्षपितविग्रहे । दत्त्वा तीर्थातिथिव्राते प्राप्ते मध्याह्ने चर्यया. ॥ १०९९ ॥
कृत्वा भुक्तिमुपस्पृश्य सुखासीनां फलादिभिः । कृताहारा वनादेत्य जगौ मलयसुन्दरी,—॥ ११०० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"स्थातासि त्वं किमत्रैव सखि ! तीर्थान्तरेषु वा । यातासि ?" साभ्यधाद्,–"गात्रं सखि ! मे बाधतेतराम्,॥११०१॥
कम्पते दक्षिणं चक्षुर्न जाने किं भविष्यति ?" । अत्रान्तरे प्रतीहारी तां प्रविश्य व्यजिज्ञपत् ॥ ११०२ ॥
"निजप्रस्थानवेलायां "कुमारं हरिवाहनम् । स्कन्धावारं निजं भद्र ! नय." इत्युक्त्वा विसर्ज्जितः ॥ ११०४ ॥
यस्त्वया चित्रमायाख्यो भर्तृपुत्रि ! नभश्चरः, । विषण्ण इव स द्वारि दिदृक्षुरवतिष्ठते." ॥ ११०५ ॥
तच्छ्रुत्वा साध्वसाद्देवी न किमप्युत्तरं ददौ. । गिरा मलयसुन्दर्याः स प्रविश्यानतोऽब्रवीत्,–॥ ११०६ ॥
"भर्तृपुत्रि ! त्वदादेशादेकशृङ्गगिरौ मया । कुमारः सर्वतोऽन्विष्टो, न तु क्वापि विलोकितः. ॥ ११०७ ॥
ज्ञातुं तथापि तद्वार्त्तां नियुक्ता दिक्षु खेचराः. । तच्छ्रुत्वा सहसा देवी विच्छायवदनाभवत्. ॥ ११०८ ॥
अवोचदथ सन्तप्तस्वान्ता मलयसुन्दरी,–। "अन्वेषय स्वयं गत्वा सखि ! तं नृपनन्दनम्, ॥ ११०९ ॥
असौ त्वद्गमनं श्रुत्वा न जाने किं व्यवस्यति !" । तन्निशम्य विमानेन द्रुतं तत्र जगाम सा. ॥ १११० ॥
भ्रमन्तं चिरमन्विष्य तदेव जिनमन्दिरम्. । सायं प्रापदपश्यत्सा सोद्वेगं मत्परिच्छदम्. ॥ ११११ ॥
कृतप्रणामा तेनासौ दूरस्थैव जिनस्तुतिम् । कृत्वा मलयसुन्दर्या सहागान्मठमस्तकम्. ॥ १११२ ॥
तस्मिन् शिलातलन्यस्तनिःसहाङ्गी सखीवृता । गाढदाहज्वरोत्तप्ता कथञ्चिदनयन्निशाम्. ॥ १११३ ॥
प्रातरावश्यकं कृत्वा निविष्टा देवताङ्गणे, । "वेत्ति कश्चित्कुमारस्य वृत्तम् ?"इत्यवदत्स्वकान्. ॥ १११४ ॥
अथ सन्दीपनो नाम खेचरः प्रणतोऽब्रवीत्, । "देव्यहं चित्रमायेन प्रहितः प्राक्तनेऽहनि, ॥ १११५ ॥
मया चान्विष्यताश्रावि निषादेभ्यो, यथा–"किल । गतः कुमारो वैताढ्यप्रपातं सार्वकामिकम्." ॥ १११६ ॥



For Private and Personal Use Only

परतरतु न जानामि किमपि." एतन्निशम्य सा । अङ्के मलयसुन्दर्याः पपात गतचेतना. ।। ११२७ ।।
क्षणाच्च लब्धचैतन्या प्रवर्त्तितवती सखीः । सर्वायतनपूजार्थं मूलचैत्यमगात् स्वयम्. ।। १११८ ।।
मणिकुम्भैः कृतस्नाना भक्त्याऽभ्यर्च्य जगद्गुरुम्. । श्रुत्वा बाष्पायमाणाक्षियुगापृच्छय परिच्छदम्, ।। १११९ ।।

[ तिलकमञ्जरीकृतभगवत्स्तुतिः–"प्रणतवत्सल ! सकललोकालोकगोचरज्ञानालोक ! भव्यलोकशोकापनोद ! दर्शितदयादमप्रधानध्यानमार्ग ! मुद्रिताशेषदुर्गतिद्वार ! झगिति विस्मृताकृत्रिमतापरोपचारस्य दूरीकृतानुरक्तजनसन्निधेरनणुवज्रपाषाणपरुषहृदयस्य दुर्विदग्धबुध्धेरनेकदुःसहदुःखसंभारभाजनस्य भगवन् भव जनस्यास्य जन्मान्तरे शरणम्. " ]

अन्त्यप्रसाधनं कृत्वानुयाते प्रणयिव्रजे । जलप्रवेशसङ्कल्पाद्दृष्टपारसरोऽगमत्. ।। ११२० ।।
अथ विज्ञातवृत्तान्तखेचरेन्द्रविसर्जितः प्रकर्षाख्यः । प्रतीहारः परोभूय व्यजिज्ञपत्, ।। ११२१ ।।
"देवि ! त्वज्जनको वक्ति, "युक्तं मोक्तुं स्वजीवितम् । भवान्तरगतप्रीतेः पत्युर्गुणनिधेः कृते. ।। ११२२ ।।
निमित्तैः किन्तु निश्चित्य कुमारस्य शुभं मया । अवधीकृत्य षण्मासानन्वेष्टुं प्रहिता नराः, ।। ११२३ ।।
अन्विष्य यावदायान्ति ते चात्रामानुषोत्तरात्, । तावदुत्सुकयापीह स्थातव्यं ननु वत्सया." ।। ११२४ ।।
इत्थं निवारिता तेन गुर्वतिक्रमाक्षमा । वनवासमुरीकृत्य तत्रैवावस्थितिं व्यधात्. ।। ११२५ ।।
फलादिकल्पिताहारा निशासु स्थण्डिलाशया । त्रिसन्ध्यं कृतदेवार्चा निन्ये सा मासपञ्चकम्. ।। ११२६ ।।
अद्यैकादिनशेषे च षष्ठे मासीक्षितुं दिनम् । अशक्तः श्वस्तनं, पित्सुर्गतोऽहं कामिकं भृगुम्. ।। ११२७ ।।
अथाकस्मात्समागत्य खेचरैर्युक्तवादिभिः । दर्शितो देवपादान्तमिहानीयातिसत्वरम्." ।। ११२८ ।।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्निशम्य स्मरन् सर्वं गीर्वाणावासजं सुखम् । गन्धर्वकाय नेपथ्यमुपनीयाखिलं निजम्. ॥ ११२९ ॥
समं नभश्चरानीकैरेकशृङ्गशिरोमणिम् । तज्जिनायतनं गत्वा कृतादिजिनपूजनः, ॥ ११३० ॥
प्रियङ्गुसुन्दरीस्नेहात् तद्विलोक्य पुनः पुनः । नाकलिप्या समुत्कीर्णां वाचयित्वाक्षरावलीम्, ॥ ११३१ ॥
कृत्वा मलयसुन्दर्या संभाषमभियुज्य च । गन्धर्वकं निजोदन्तख्यापनाय तदन्तिके, ॥ ११३२ ॥
परिवारोपदिष्टाध्वा दिव्यारामोदरस्थिते । अपश्यं कन्दलीगेहे देवीं तिलकमञ्जरीम् ॥ ११३३ ॥
सविषादसखीवृन्दोपनीतशिशिरक्रियाम् । लावण्यलक्ष्यां बालेन्दोर्लेखाशेषां कलामिव ॥ ११३४ ॥
अथाभिवर्द्धसे देवि ! "प्राप्तोऽयं हरिवाहनः । राज्यं प्राप्योत्तराश्रेण्याश्च"इत्याकर्ण्यसखीजनात् ॥ ११३५ ॥
आरोप्योरसिजद्वन्द्वे जलार्द्रं च तदंशुकम् । सहसोत्थाय निक्षिप्तचक्षुषं तामवादिषम्, ॥ ११३६ ॥
"अलं देवि ! प्रयासेन, लेखाशेषेण तेऽमुना । वपुषैवाल्पदुःप्रायः स्वप्रसादः प्रकाशितः, ॥ ११३७ ॥
प्रसीदाध्यास्व पर्यङ्कम्."त्युक्त्वा रत्नविष्टरम् । अध्यतिष्ठं सखीदत्तं. त्वमेवाथ समागतः." ॥ ११३८ ॥
इत्थं समरकेतोः स्वं गजापहरणादिकम् । वृत्तं निवेद्य विरते कोशलाधिपनन्दने ॥ ११२९ ॥
पार्श्ववर्त्ती जनः प्रीतश्चन्द्रकेतोः सुतं विना, । स तु तूष्णीक एवास्थान्निःश्वासध्यामिताधरः. ॥ ११४० ॥
"पूर्वं जातिस्मृतेर्नूनमयं शोकेन पीडितः." । इति ध्यात्वा सखेदस्तमुवाच हरिवाहनः. ॥ ११४१ ॥
"युवराज ! किमाचारस्तवेतरजनोपमः ? । भवान्तरस्य चिन्ता हि स्वप्नविज्ञातसन्निभा. ॥ ११४२ ॥
तद्विधायाधुना धैर्य, कृत्यं कालोचितं कुरु. । समाश्वासय शोकाब्धिमग्नां मलयसुन्दरीम्."॥ ११४३ ॥



For Private and Personal Use Only

ततस्त्रपानतोऽवादीदङ्गनाथः "कुमार ! मे । किमुक्तेन, तदाश्वासे यत्नश्चेत्किञ्चिदादिश. ॥ ११४४ ॥
अस्मदागमनोदन्तं ज्ञापय, अहं तु विप्रियम् । तस्याः पूर्वभवात्कृत्वा नास्यं दर्शयितुं क्षमः." ॥ ११४५ ॥
अथ विज्ञापयामास दण्डिनी हरिवाहनम्, । "विजनं क्रियतां देव ! खेचरस्त्वां दिदृक्षते ॥ ११४६ ॥
विचित्रवीर्यप्रहितो द्वारि कल्याणकाभिधः । श्रावयिष्यन् कमप्यर्थं कमनीयतमं तव." ॥ ११४७ ॥
अथोत्थितेषु तच्छ्रुत्वा सिंहलेन्द्रसुतादिषु । प्रवेशितःप्रतीहार्या नत्वासौ लेखमक्षिपत्. ॥ ११४८ ॥
उपनीतासनासीने तस्मिंश्च हरिवाहनः । सादरस्तमुपादाय सप्रमोदमवाचयत्,-॥ ११४९ ॥
"स्वस्ति, श्रीमत्त्रिकूटाद्रेर्नृपचक्रनतक्रमः । देवो विचित्रवीर्याख्यः स्वःपुरीरम्यताजुषि ॥ ११५० ॥
श्रीमत्याग्रुत्तरश्रेणौ कीर्त्तिगङ्गाहिमाचलम् । महाराजाधिराजस्य नन्दनं हरिवाहनम् ॥ ११५१ ॥
संयोज्य सकलक्षोणिविजयाधिगमाशिषा । सुखयत्युदितानन्दं स्वदेहारोग्यवार्त्तया. ॥ ११५२ ॥
परिकल्प्य वरत्वेन सिंहलाधिपनन्दनम् । मया मलयसुन्दर्याः प्रारब्धोद्वाहनक्रिया. ॥ ११५३ ॥
आनीता च निजावासमियं कल्याणभागिनी । तथैव वल्कलच्छन्ना, ज्ञातिलोको निमन्त्रितः ॥ ११५४ ॥
स्थापितं च शुभं, ग्रम्लइत्ययं मदुपक्रमः । न यथा हास्यतां याति, कृत्यं कल्पायुषा तथा." ॥ ११५५ ॥
विचार्य चास्य तात्पर्यमुवाच हरिवाहनः,-। "युवराजः समायातस्तातेन विदितः कथम् ? ॥ ११५६ ॥
कथं चायं वरत्वेनाज्ञातशीलोऽप्युरीकृतः ? । इत्युक्तः सोऽवदद्,-"देव ! सर्वं वच्मि निशम्यताम्, ॥११५७॥
सख्या तिलकमञ्जर्याः समतिक्रान्तवासरे । मृगाङ्कलेखया देवी पत्रलेखाऽभ्यधीयत,-॥ ११५८ ॥

"वर्द्धसे युगपद्देवि ! द्वैतीयीकवरोत्सवे । प्राप्ते मलयसुन्दर्याः" इत्युदीर्य यथाश्रुतम् ॥ ११५९ ॥
उक्तं तिलकमञ्जर्याः देवेनैवाद्यदर्शने । कुमारं समरकेतुं वरीतारं अवेदयत्. ॥ ११६० ॥
इति श्रुत्वाऽवदद्देवी तूर्णं मलयसुन्दरीम्, " । सख्यानय येन चैक्षे विवाहमुभयोरपि" ॥ ११६१ ॥
सा प्रत्युवाच, "देवीदं युक्तं, किन्तु विधेयता । अस्मिन् विचित्रवीर्यस्य ज्ञानिना मुनिनोदिता, ॥ ११६२ ॥
तदादिश तमेवाहं येन गत्वा प्रवर्त्तये." । तथेत्युक्त्वा तथा सा च व्यधात् सर्वं यथोदितम्. ॥ ११६३ ॥
तत्सर्वमिति विज्ञप्तं देवादिष्टं मयाधुना, । कुमारः प्रेष्यतां लग्नं प्रत्यासीदति साम्प्रतम्, ॥ ११६४ ॥
प्रशान्तवैरादानीता सम्प्रत्येवातिदुर्बला । तरङ्गलेखा स्पृहयन्त्याशुगन्धर्वकागमम्, ॥ ११६५ ॥
युक्तः काञ्चीपतेर्लोको विद्याधरजनैः सह." । इत्युक्ते समरकेतुमाहास्त हरिवाहनः ॥ ११६६ ॥
सहासमभ्यधाच्चेनमाबद्धकरसम्पुटः, । "चम्पाधिप ! किमद्यापि चिन्तयसि ? उद्यमं कुरु. ॥ ११६७ ॥
अनुतिष्ठ गुरोर्वाक्यम्, अद्यापि त्वयि वीक्षिते । वल्कलानां परित्यागं कर्त्ता मलयसुन्दरी." ॥ ११६८ ॥
इत्युक्त्वा तं सुवेलाद्रौ खेचरानीकसंयुतं । प्रहित्य सायमावासं ययौ स्वं हरिवाहनः. ॥ ११६९ ॥
अतीतायां च शर्वर्यां कृतप्राभातिकक्रियः, । कृतोपचारः सततं चक्रसेनमहीभुजा, ॥ ११७० ॥
प्रेषितैराप्तपुरुषैः कृतप्रीतिप्रकाशनम्, । एकदा च जगामैनं द्रष्टुमल्पपरिच्छदः. ॥ ११७१ ॥
परापदक्षिणश्रेणिमनेकपुरशोभिताम् । देवतायतनारामसरःश्रेणिमनोरमाम्. ॥ ११७२ ॥
आकर्णितागमेनाथ विहायश्चरचक्रिणा । प्रत्युद्गम्य निजावासं नीतो विरचितोत्सवम्. ॥ ११७३ ॥

तत्रानेककृताचारो विहितस्नानभोजनः । कियन्त्यपि दिनान्यस्थाच्चक्रसेनानुरोधतः. ॥ ११७४ ॥
आयातेऽथ प्रशस्तेऽह्नि मिलितानेकभूपति । निर्मापितपुरीशोभं भोजितज्ञातिसन्तति ॥ ११७५ ॥
सम्पूजितगुरुश्रेणि पूरितार्थिमनोरथम् । तस्मै विद्याधरेन्द्रेण ददे तिलकमञ्जरी. ॥ ११७६ ॥
तामुद्वाह्य दिनान्येष स्थित्वात्रैव कियन्त्यपि । कृतार्थीकृत्वा निःशेषानुभयश्रेणियाचकान् ॥ ११७७ ॥
पुरो भागे समारोप्य देवीं तिलकमञ्जरीम् । धृतातपत्रः सद्भूपमारूढो जयवारणम् ॥ ११७८ ॥
समं खेचरचक्रेण जगाम नगरं निजम् । तुङ्गप्रासादशृङ्गस्थसकौतुकपुराङ्गनम्. ॥ ११७९ ॥
प्रविश्य च निजावासे विहितानेकमङ्गलः । समं तिलकमञ्जर्या बुभुजे भोगसन्ततिम्. ॥ ११८० ॥
ततः कतिपयाहेषु सिंहलेन्द्रस्य नन्दनम् । आनेतुं प्रेषयामास प्रधानपुरुषान्निजान्. ॥ ११८१ ॥
सोऽपि विद्याधरेन्द्रेण साभ्युत्थानं निजे गृहे । नीत्वा मलयसुन्दर्याः कारितोद्वाहमङ्गलः ॥ ११८२ ॥
स्थानस्थानकृतप्राज्यपूजो बन्धुभिरन्वहम् । गुरूनापृच्छ्य सम्प्राप विजयार्द्धमहीधरम्. ॥ ११८३ ॥
नृपत्वमुत्तरश्रेणौ कोशलाधिपतेः सुतः । प्रीतिप्रह्वीकृतस्तस्मै साधिकारगणं ददौ. ॥ ११८४ ॥
श्रुत्वा च खेचरालिभ्यश्चरित्रं विस्मयावहम् । आहूयानुगतं भूपैश्चन्द्रकेत्वात्मजादिभिः ॥ ११८५ ॥
विधिवत्तं प्रशस्तेऽह्नि राजा श्रीमेघवाहनः । प्रीतो निवेशयामास हैमे सिंहासने निजे. ॥ ११८६ ॥
प्रारेभे च स्वयं कर्त्तुं परलोकस्य साधनम् । स्वसूनोः स्पर्द्धयेवासावुद्वृत्तोरुक्षमाभरः. ॥ ११८७ ॥
चैत्यालीषु महामहं, गुरुजने भक्तिं दधानोऽन्वहं, दुष्टारातिषु दण्डपातनभियं, मित्रेषु राज्यश्रियम्, ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भुञ्जानः सह चक्रसेनसुतया संसारसारं सुखं, चक्रे श्रीहरिवाहनोऽपि सुचिरं चक्रित्वमुर्वीतले. ॥ ११८८ ॥

इति श्रीतिलकमञ्जरीकथासारं श्वेताम्बरपं० लक्ष्मीधरकृतं समाप्तं.

एकाशित्या समधिकरविशतविक्रमगते समानिवहे [ १२८१ ]
शुचिसितपक्षतिरविवारहरभं ध्रुवयोगबवकरणे ॥ १ ॥

[ संवत् १२८१. शुक्लपक्षे रविवारे आर्द्रानक्षत्रे ध्रुवयोगे बवकरणे ग्रन्थरचना, इत्यथ.—संशोधकः ]

इदमस्यां चक्रेलेखयां तिलकमञ्जरीकथासारम् । श्रीमत्प्रसन्नचन्द्रस्य शीलभद्रेण शिष्येण

संवत् १४७४ वर्षे लिखितं श्री डूंगरपुरे ॥



For Private and Personal Use Only